CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Almira 3
shelf 2
24

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दकौस्तुभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ श्रीगणेशाय नमः ॥ ॥ विश्वेशं सच्चिदानंदं वंदेऽहं योऽखिलं जगत् ॥ चरीकर्त्ति बरीभर्त्ति संजरीहर्त्ति लीलया ॥१॥ नमस्कु
र्वे जगद्वंद्यं पाणिन्यादिमुनित्रयं ॥ श्रीभर्तृहरिमुख्यांश्च सिद्धांतस्थापकान् बुधान् ॥२॥ नत्वा लक्ष्मीधरं तातं सुमनोवृंदवंदि
तं ॥ फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्ध्रियते ॥३॥ परिभाष्य बहून् ग्रंथान्योऽर्थः क्लेशेन लभ्यते ॥ तमशेषमनाया
सादितो गृह्णीत सज्जनाः ॥४॥ समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभं ॥ महेशोऽजिमद्दैर्जनुषः साफल्यं लब्धुमी
हते ॥५॥ प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान्भाष्यकारः प्रदर्शयति । अथ शब्दानुशासनमिति । अथ शब्दः
प्रारंभस्य द्योतकः । न तु वाचकः । निपातत्वात् । उपसर्गवत् । न चैतेऽपि वाचका एवेति वाच्यं । उपास्यते गुरुरनुभूयते सुख
मित्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैव युक्त
त्वात् । नन्वेवं युक्ता अन्यत्रोपसर्गाणां द्योतकता निपातानां तु वाचकत्वमेवेति चेन्न । साक्षात्क्रियते नमस्क्रियते उरीक्रिय
ते अलंक्रियते इत्यादौ कर्मणि लकारेण कर्मणोऽभिहितस्य गुर्वादेरभिधानसिद्धये धात्वर्थं प्रति कर्मत्वस्य वाच्यत्वात् । उ
पसर्गत्वापेक्षया विपर्यस्याधिकरणं तन्नयानद्वेष्ठदैनेव द्योतकता कल्प्यतां । सामान्यप्रमाणानां पक्षपातात् । निपा
तत्वं वा खंडोपाधिरूपं जातिरूपं शब्दस्वरूपमेवेति पक्षत्रयेऽपि प्रादिचादिसाधारणमेव । प्रत्तादिप्रयोगेऽनेकपर्य्यवसन्नं

सदसद्विवे
कञ्जेसा ५

त्वे २ धं १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदितिपक्षेपि प्रादीनां चादिभ्यो वैलक्षण्यानिरुक्तेः। केवलानामप्रयोगेण अन्यलभ्यतापि तुल्यैव। विजयत इत्यत्र धा
तोर्विशिष्टजय इव घटस्येव न त्वन्वितघटे घटशब्दस्यापि लक्षणायाः संभवात्। किंच चादीनां वाचकत्वे समाना
धिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातेतरविषयकतया विना प्रमाणं संकोचनीया स्यात्। स्ता
वं समुच्चयादिशब्दप्रयोग इव चादिप्रयोगेपि घटादेः षष्ठी। किंच समुच्चयादिपदेनुपस्थितेन यथा विशेषणसंबंध
स्तथा चादिभिरनुपस्थितेपि स्यात्। द्योतकत्वपक्षे तु पदार्थैकदेशत्वान्न तत्र विशेषणान्वयः। अपि च शौरे तु स्लेषि
वोदीच्यानुद्धरिष्यन्त्यानि देव्यादैत्यात्सहस्रैः शौरे समस्तस्य नुदीच्यानुद्धरिष्यन्तित्यादिरर्थः। स च उक्तादिशब्दा
नां तत्सहयायत्वे इव शब्दस्य च तात्पर्यग्राहकत्वे सत्येव लभ्यते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकता
पि भज्येत इव शब्दानुवृत्तौ यादुर्लभा। असत्वार्थकतया कारकविभक्त्ययोगात्। एवमप्युक्तादिभ्यस्तत्तोपाया। अनन्वय
स्यानुद्धाराद्या नन्वेवं नञ्तत्पुरुषस्योत्तरपदार्थप्राधान्यमित्यादिसिद्धान्तभङ्गः स्यादिति चेन्न। सर्वपदद्योत्यं प्रति प्राधा
न्यमिति तदर्थात्। द्योत्यार्थेनैवार्थवत्त्वेन निपातप्रातिपदिकत्वसिद्धिः। अत एव येषां द्योत्योप्यर्थो नास्ति तु हि च स्म ह वै
पादपूरणे इत्यमरकोशात् केषांचिदिति पादपूरणार्था इति निरुक्ताद्यात् तदर्थनिपातस्यानर्थकस्याति वा निकारं

(कर्मईम्ह्इतर्उ१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा०कौ०
१
भाष्यमेवमास्तु रं चेदं कैयटादिग्रन्थेषु। अनस्य वाक्यस्याधिकरणत्वे हेतुक्तौ चानुविधेयपदे चात्रापि विषयस्यार्थे निरूप
क्रियते संज्ञयोन्यत्र तेर्नोपसर्गनिपातयोः। तयोरर्थाभिधाने हि व्यापारो नैव विद्यते। पदार्थद्योतको योत्र वाचकः स वि
वार्यते इति। यत्तु अर्थवत्सूत्रे अधीत इत्यादौ धातोरनर्थकता उपसर्गविशिष्टस्य वाचकतेति कैश्चिदुक्तं तद
सद्रूपमात्रं सर्वस्यैव इति सूत्रे कैयटादिग्रन्थेष्वेवमेव। पूर्वोत्तरमीमांसयोस्तत्र तत्र तत्र नञः पर्युदासे लक्षणेति ग्र
न्थाः अप्येवमेवोक्तप्युक्तेः। अत एव वामनतां तरं निपाता वाचका इति। सर्वथापि प्रादयो द्योतकाश्चादयस्तु वाचका
इत्येवं तु पमर्दै जरतीयं नैयायिकाभ्युपगतमप्रमाणकमेवेति दिक्। अनुपूर्वः शासिर्विविच्य ज्ञापने दृष्टः। तथ क०६
था। अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः। एषा वा। संमुपन्न विदुषा नयथो अंजसानुशासनि
यश्वेदमिति ब्रुवता। अत्र हि गुणत्रयोपेतेन समुद्गुणा अस्मान् शिक्षयतीति एषा प्रार्थ्यते। अत्र अंजसेति शी
घ्रमुक्तो। अनुशासनीति विविच्य बोधकत्वं। वङ्कुलं छंदसीति शपो न लुक्। इदमित्यूमेवेति योग्यादितिप्र
त्यपति कर्षं उक्तः ब्रवदित्यत्र लेटोऽडाटाविति अटागमश्च। अनुशिष्यते विविच्य असाधुशब्देभ्यो विभज्य बोध्यन्ते ये
नेति करणे ल्युट्। ततः शब्दानामिति कर्मणि षष्ठी। नदं तेन समासः। न च कर्मणि चेति सूत्रेण समासनिषेधः शा०क०
२

(इदं शरीरं कौन्ते य क्षेत्रमित्यभि धीयते ५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इह तु शब्दानामिदमनुशासनं न त्वर्थानामित्यर्थनिवृत्तिपरं वाक्यं न तु कर्तृविशेषनिवृत्तिपरं। अतो नास्त्युभयप्राप्तिः। ४x

शंकते। अत्र च शब्दस्य इति शब्दार्थकत्वया कर्मणीति शब्दवता उभयप्राप्ताविति सूत्रेणाप्याषष्ठीनदं तं न समस
तेइत्यपीत्ताई यं तु कर्तृकर्मणोरिति विहिता षष्ठी न तु उभयप्राप्ताविति। आचार्यस्य कर्तृत्वे क्तेनः सत्येपीहानुपादाना
त्। चित्रं गवां दोहोऽगोपेनेत्यत्र हि आश्चर्यप्रतिपादनं तद्विषयघटिताक्षितो दोग्धा दुर्दोहा गावस्तु दोग्धव्यास्तदेव
निर्वहतिन तत्पथा। अतः कर्तृकर्मणोर्विशिष्योपादानादस्तुभयप्राप्तिः। अस्तु वा यथाकथंचिदुभयप्राप्तिः। त
थापि न क्षतिः। उभयप्राप्ताविति सूत्रे अविशेषेण विभाषेति पक्षस्यापि वक्ष्यमाणत्वात् यानियमात्प्रवृत्तिप
क्षे आचार्यस्य शब्दानुशासनमिति प्रयोगसंभवात्। शेषलक्षणा षष्ठी वा स्यात्। तस्माद्वैदिका लौकिकाश्च सा
धवः शब्दा इह विषय इति स्थितं। वेदे भवा वैदिकाः अध्यात्मादित्वात् ठञ्। एवं लोके भवा लौकिकाः। यद्वा।
लोके विदिता लौकिकाः। तत्र विदित इत्यत्र तु वर्त्तमाने लोकसर्वलोकाट्ठञ्। प्रातिशाख्यशिक्षावन्न वैदिकैक
देशमात्रमिह विषयः। न वा व्याकरणान्तरेष्विव छांदसपरित्याग इति सूचयितुमुभयोपादानं। इति विष (लौकिकावैदिका इति ३)
यनिरूपणं॥ ॥ स्यादेतत्। गौरित्यादिः शब्द इह विषयः। तत्र च गकार औकारो विसर्गश्च घटकः। व्युत्पाद्येतत्त
ङोप्रत्ययस्कप्रत्ययवा देशादिकं। न चैतद्गोरिति बोधे भासते तथाचापर्याप्तं तेन। गौरित्यनेन परिनिष्ठितेन

(अनाकांक्षिताभिधानत्वं)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं ज्ञिप्रभृतीनां संबंधविशेषत्वात्स्मृतिपत्त्युपयोगिता चास्तीति तत्प्रतिपादनमिति चेन्न । शब्दांतरस्याप्युक्तस
संबंधस्योपयोगस्य च दुर्वचत्वात् । द्रव्यगुणादिपदार्थानामिह व्युत्पादनापत्तेश्च । अस्ति हि तेषां गौरित्यनेन
वाच्यवाचकभावादिः संबंधः । अतएव शब्दबोधे गविसमवायेन गोत्वमिव शक्त्याख्यसंबंधेन शब्दो विशेषणत
तया भासते चाक्षुषबोधेपि व्यक्त्यास्मारितः शब्दो विशेषणमित्यभ्युपगमः । आह च । न सोस्ति प्रत्ययो लोके यः श
ब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते । ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वश
ब्दानामेते पृथगवस्थिते इति । यत्संज्ञास्मरणं तत्र न तदप्यहेतुकं । पिंड एव हि दृष्टः सन्संज्ञां स्मारयितुं क्ष
मः इति चायुक्तं चेन्न तत्र गृहीतशक्तिं प्रति शब्देनार्थस्येव अर्थेन शब्दस्यापि स्मरणे बाधकाभावात् । अतए
व गोत्वस्येव गोशब्दस्यापि व्यक्तिविशेषणत्वात् विशेषणसंसर्गोपि तादात्म्यमेवास्तु । एवं गोगुणादिभि
रपि तदभिन्नाभिन्नस्य तदभेदादित्याशयेनाथ गौरित्यत्र कः शब्द इत्यत्र प्रघट्टके द्रव्यगुणकर्मसामान्यैः
सह शब्दस्याभेदो भाष्यकृद्भिः शंकानिराकृतः । तत्र निराकरणग्रंथस्यायमाशयः । समसत्ताकभेदाभेदौ
विरुद्धावेव । अन्यथा त्वदुक्तरीत्या सत्तागुणत्वाद्यभेदात्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौ प्रवृत्तिनिवृत्ति राम॰

वाचकःशब्दः६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(श्रुतोपज्ञतभेदग्रहात् १

(असम्भवयोस्तादात्म्यात् १

अवस्थानस्यातानसाद्यभेदग्रहान्न्मनिवृत्तिः। जातिव्यक्त्यादिसंबंधस्त्वतिरिक्तएवेति। एवमेवशब्देनापिस

हास्येवसंबंधोद्वचादीनामितिस्थितं। अस्तिचद्वयादिव्युत्पादनस्यप्रकृतेउपयोगोपि। अस्मिन्नर्थेयः पंसाधुरित्य

पविशेषपुरस्कारेणैवसाधुत्वस्यवक्तव्यत्वात्। अतएववाजिनिद[illegible]रिद्रेचक्रमेण अश्वशब्दो अस्वशब्दश्चसाधुर्युक्त

पधा४ मेणत्वसाधुरितिसिद्धांतः। ननुवैशेषिकादीनामेतच्छास्त्रसिद्धमेवप्रकृतिप्रत्ययविभागमुपजीव्यपदार्थव्युत्पादना दि४

यप्रवृत्तिः प्रकृतिप्रत्ययादिविचारस्तत्काचित्कः प्रासंगिकः। तथेहापिलोकप्रसिद्धंदर्शनांतरसिद्धंचपदार्थज्ञानमुप

जीव्यशब्दमात्रव्युत्पादनेनतविनुद्यमतइतिचेन्न। अस्मतावेदेवांतथापिप्रश्नप्रतिव्युत्पादनंतुतिः फलमेवेतिचेन्न।

अत्रोच्यते। गोस्त्रिपातिदेवदत्तः पचतीत्यादयः प्रयोगाःहिक पातावज्ञत्मसहस्रेणापिवोधयितुंवाइंक्याश

क्यानंत्यात्। अतः प्रकृतिप्रत्ययविभागकल्पनात्पोलघुभूतउपायः समाश्रीयते। लिपिवत्। आरोपितस्यैव

चतत्रसंबंधः। प्रसिद्धोहिस्थूलारुंधतीशाखाचंद्रादिन्यायोलोके। पंचकोशावतरणन्यायश्चोत्तरमीमांसायांतत्रा

त्पर्यविषयावाधाच्चप्रामाण्यं। एवमेवहार्यर्थवादेष्वपिगतिः। आत्मवपोत्खेदनप्रश्नतीनांवाधेपितात्पर्यविषयीभू

तस्यप्राशस्त्यस्यावाधितत्वात्। उक्तंचहरिणा। उपायाः शिक्षमाणानां वालानामुपलालनाः। असत्येवर्त्मनिस्थि

(सप्रजापतिरात्मनोवपामुदखिदत् २)

एतादृशस्थलेइडागमाप्रवृत्तिरेव। तथाचनिष्ठायांसेटीतिप्रत्याख्येयमितिभावः।२
आ॰ पिव्यवहारइत्यनेन ३

श॰ कौ॰ ४ त्वाततःसत्यंसमीहतेइति।उपेयप्रतिपत्त्यर्थाउपायाअव्यवस्थिताइतिवा।अन्तरेवहिकेचित्प्रत्ययंविदधति।अपरे
श्तिपास्तत्रीरीत्यापाठितमित्यत्रइत प्रत्ययः।भाष्यरीत्यातु मत्पः।तत्रीरीत्यानावातितिवतुश्शव्वृतावर्थविशेषा
उक्त३ दितिवार्त्तिकरीत्याश्तिवनुश्तितिदिक्।एतेनपचतीत्यादौआदेशैःस्मर्यमाणालडादयोबोधकाइतिवदन्तःपरास्ताः।
तथाहिइदव्यवहाराच्छक्तिग्रहइतिनिर्विवादं।ततश्चप्रयोगसमवायिनामेवतिप्प्रभृतीनांशक्तिःसिध्यति।नतुलौ
किकानांलादीनां।एवं डुपचष्डुकृञ्इत्यादिप्रकृतयोविच्क्विबादिप्रत्ययाश्चनवाचकाः।किंतुअपाक्षीत्पपाच
पापच्यतेकरोतिचकारचर्करीतिइत्यादिप्रयोगसमवायिनःअपाक् पपाचइत्यादयएव।प्रमाणेनडुपच
ष्प्रभृतीनांस्मरणंतेनार्थबोधइतिचेन्न।लाघवाद्व्यवस्थितत्वाच्चप्रमाणानामनेकार्थकल्पनायांओत्रिक्षिकस्य संबंध५
स्मरणकल्पनेगौरवात्।अव्यवस्थापत्तेश्च।पचतीतिदेवदत्तःपचन्तंपश्येतितिप्शतृप्रभृतिस्मारितस्यलस्यएवबो
धकत्वएकत्राधाराधेयभावेनसंसर्गेणदेवदत्तेआख्यातार्थोपन्नोविशेषणं।इतरत्रतुअभेदेनसंसर्गेणकृदर्थे
कर्त्ताविशेषणमितित्वत्सिद्धान्तभंगापत्तेश्च।एतेनकर्त्रधिकरणेआख्यातार्थत्वंकर्त्तुर्निरस्तं।तत्रअभ्यमानाधिक
रणेत्यानतजर्थत्वंस्वीकुर्वन्तोमीमांसकाअपिपरास्ताः।यत्तुतेनुक्तंस्थानंजंशेकर्त्तरिकौदितिव्याकरणंशक्तिग्राहकं राम॰ ४

(प्रयोगेष्वविद्यमानत्वात् ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मस्तीति तल्लाभात्। ततः ह्रस्वाकर्षोपस्थितिर्विशेष्येषु रावुलादिषु प्रतिष्ठते ननु भ्रात्रादिषु स्यात्स्वार्थेन निराकांक्षत्वादि
तिवक्ष्यमाणत्वात्। आकांक्षितविधानेऽन्याय इति न्यायात्। अन्यथा क्रियमाण इति कर्मणि शानचोऽर्थेऽलस्यापत्तेश्च।
किंच कर्त्तरि कृदिति यत्कर्तृग्रहणं तदेवलः कर्मणीमन्त्राप्यनुवृत्तेनलकर्थेऽतिङ्कृतां चैवलक्षणं। अन्यलभ्यत्वाद्देनुभ
यत्र सामान्तानामर्थयोरभेद एव संसर्ग इति शानजादौ कर्त्ता वाच्य इत्युक्तं। तत्र पचति कल्पं पचति रूपं देवदत्तेऽपि सा
धनुरोधात्तिङ्स्वपि तुल्यं। तस्मान्महर्षीणां कथ्रिततत्रत्रेतानित्तिङ् तेऽवपचहेतुः। अस्मद्दीक्षानुभावप्रधानमाख्यातमिति स
लप्रधानानि नामानीति निरुक्तकारोक्तेः। प्रत्ययार्थप्राधान्यमौत्सर्गिकमिति तिङ् [illegible] ल्पसेत। प्रधानप्रत्ययार्थवच धृ६
नमर्थप्रस्यात् प्रमाणत्वादिति सूत्राच्च। शतृशानज्विधौ रूपविधौ च माघेऽस्फुटमेतत्। पाचको व्रजतीति वत्पचति
व्रजतीति प्रयोगोऽप्यत एव। तापयति। पचति भवतीत्यादिवो पपद्यते। पचते। रूपं पचति रूपमित्यादौ रूपवाच्येन द्विवच
धृ५ नादिवत्न भवति। तस्मात्तिङ् [illegible] कृत्सु च विशेषणविशेष्यभावव्यत्यासे मस्तीति वक्ष्यते। एतदुभयहेतुकं। कर्त्तरि यदेक
त्वं तत्रैकवचनं तिविति लादिविधेर्द्व्येकयोरित्यादेश्चैकवाक्यतया व्याख्यानात् कर्त्तुर्वाच्यता सूत्रादायातीति तल्लाभा
सा२ ततः द्विवचनादिसंख्यादेशतिघातस्तत द्विविधनाद्व्येकयोरित्यस्यैकवाक्यतानवत्तत्र कर्त्तरीत्यस्ति। यद्द्वित्वादिविशे
षणान्तयाकर्षविघ्नोऽप्यत्र लविधितिवादिविधोरप्येकवाक्यतास्तीति चेत्सत्यं। वाक्यैकवाक्यतातु स्यान्नतु पदैकवाक्य

(रूपपाक्रियागतं प्राशस्त्यं प्रतीयते सा च क्रियाऽसत्वभूतेति न द्विवचनादि ४) {स्वार्थबोधे समाप्तानां संगांगित्वाद्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥१॥ २}

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(स्वस्यानिस्यानिवाच्यतसर्वं०२ (आदेशानां तन्मतेऽनर्थकत्वेन शक्तिलक्षणा स्यात्
(इत्यत्पटनेरभावादिति भावः३)

श०कौ० ५ ता। आदेशविशेषैर्लविधिलम्भ्यलकारानुवादेन प्रवृत्तेः। लविशेषो नु कर्तृग्रहणात्संभवद्विवचनादिसंज्ञाविनिर्मुक्त एव। अत
एव आदेशस्मारिता लकारा बोधका इति पक्षे एकत्वादिभानायादेशा एव शरणीकर्तव्याः। एवं णलादेशे तिवादि
द्विरुक्तलिङादिस्मरणं कल्प्यमिति महदेव गौरवं। न च परंपरासंबंधेन णलेव बोधकः। वृत्तिस्मृत्यन्तत्वात्। अतएवाप (अनर्थकत्वादेव३
भ्रंशानां साधुस्मारकतामुपगमय्य बोधीति दिक्। तस्मात्सर्वत्रासिद्धमित्यादौ यथा आहार्यारोपेणैव व्याख्याते
सर्वसंमते तथाप्यत्रापि प्रक्रियायां सर्वत्राव्यक्ततत्स्थावाचकता स्फोटैकनिष्ठा। तत्र चाष्टौ पक्षाः। वर्णस्फोटः।१
पदस्फोटः।२ वाक्यस्फोटः।३ अखंडपदस्फोटः।४ अखंडवाक्यस्फोटः।५ इत्थं पंचव्यक्तिस्फोटाः। वर्णपदवाक्यभेदेन त्रिवि
धो जातिस्फोट इति तथाहि। किंचिद्वर्णव्यत्यासादिना शक्ततावच्छेदकानुपूर्वीभंगस्य प्रतिपदमौत्सर्गिकत्वात्तत्र
च केन चित्कश्चिदपभ्रंशशक्तिग्रहात्केन कस्य स्मारणमित्यत्र विनिगमनाविरहात् घटो घटो घट इत्यादावि वक
रकार कुरु चकर इत्यादीनामप्रयोगस्तथापि तेषां सर्वेषामेव वर्णानां तत्तदानुपूर्व्यवच्छिन्नानां वाचकत्वेऽपि वर्ण
स्फोटपक्षः। कत्रेम्भ नयो वाचका न वेति विप्रतिपत्तिशरीरं।। ।। रामं रामेण रामाय हरये हरेर्हरौ इत्यादौ परि नि
ष्ठिते रूपे कियान्तेशो द्व्यादिवाचकः कियाँश्च मिलादेरित्यस्य विनिगंतुमशक्यतया रामम् इत्यादि परिनिष्ठित
पदमेव वाचकं कर्मत्वादिविशिष्टस्येति पदस्फोटपक्षः।। दधीदं हरेव विष्णोवेत्यादौ अपि विनिगमनाविरहेणो

पक्षे१

त्याद्वाक्यमेव विशिष्टार्थप्रत्यायकमिति वाक्यस्फोटः ॥ ३ ॥ एकः पट इतिवदेकं पदं वाक्यं वेत्यबाधितप्रतीतेर्वर्णाति-
रिक्तमेव पदं वाक्यं वा अखण्डं वर्णाभिव्यङ्ग्यं ॥ एकत्वप्रतीतिरौपाधिकीति चेन्न पटेऽपि तथात्वापत्तेः । कः पदार्थस्तावदिति चे-
त् । भावाभावविशेषेषु क्वान्तर्भवतीति चेन्न । लक्षणस्यापि तेषु द्रव्यादिषु मानाभावात् । नहि तावता प्रमाणसिद्धं प्रत्याख्या-
तुं शक्यते । अनियतपदार्थवादे गौरवमिति चेन्न व्यक्तीयत्ताया अपि नाक्लृप्तेः । उपाधीयत्तानुसरणे क्लृप्तवचः । भावत्वा-
भावत्वाभ्यां नित्यत्वानित्यत्वादिना वा विभजनात् । भावविभाजकोपाधयः स्फोटविभाजकोपाधिवदेव नावश्यकाः
। अस्मिंश्च पक्षद्वये वर्णा अपि न नावश्यकाः । नन्वनुभवसिद्धास्त इति चेन्न । व्यंजकध्वनिविशेषोपहितः स्फोट
एव ककाराद्यात्मना व्यवह्रियत इत्यभ्युपगमात् । भावमेतेनानेकदा गकार इतिवत् । अद्वैतसिद्धान्ते विषयस्येव
धर्जन्यवृत्तिवैचित्र्येणाव्येयेस्वरूपस्यैव वैचित्र्यवत् । अत एव वाचस्पतिमिश्राः तत्त्वबिन्दौ वस्तुतः ककारा-
दतिरिच्यमानमूर्तेर्गकारस्याभावादिति स्फोटवादिमतमुपन्यस्य नापि अखण्डेष्वपि कृकारादिषु वर्णेषु व-
र्णान्तरसमानाकारैकदेशावभासः तत्पात्र पक्षे वर्णावभासोऽपि भविष्यति । उक्तं चैवोपदेशेन । शक्यत्व इव श-
क्तेलेशानैर्लाघवमीक्ष्यतां औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवदिति । भर्तृहरिरप्याह । पदे न वर्णा विद्य-

इति भर्तृहरिः

१५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चोयमिवार्थकः

श॰कौ॰ न्ते वर्णेष्ववयवा न च । वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेति । तस्मादखण्डं पदं वाक्यं चेति पञ्चापि व्यक्तिस्फोटावां
६ तरभेदाः ॥ जातिस्फोटवादिनस्तु घोऽत्र घटत्वादिकं शक्ततावच्छेदकं तथा आद्यपक्षत्रयेऽपि यथायथं वाच्यं ॥ अ
न्यथा सरो रस इत्यादौ वर्णविशेषप्रतीत्यनापत्तेः । तत्तोपाधित्वपा उपाधिस्त्वपरंपरासंबद्धा जातिरेवास्मा च सर्वोपि
ष्टानब्रह्मस्वरूपात्मिका । तथा च शक्तांशे इव शक्यांशेऽपि न्यायसाम्येनाह्लत्वाधिकरणरीत्या ब्रह्मत्वमेव तत्र
इपाहितं वाच्यं वाचकं च । अविद्या वा आविद्यकधर्मविशेषो वा जातिरिति पक्षे तु मेव वाचिकास्तिन्नाडः ॥ अष्टा
वप्येते पक्षाः सिद्धान्तग्रन्थेषु तत्र तत्रोपनिबद्धाः । तथा हि स्यान्निवर्त्तन्ते सर्वे सर्वपदादेशा इति भाष्यग्रन्थः । पद
६५ तेऽर्थोऽनेनेति अर्थमेव दिपदं । ननु स्फुटतिः तन्वेवा तथा च स्फुरिमस्तेस्फुरित्यर्थ इति टीकाग्रंथः स्वर्णस्फो
टे अनुकूलः । तथा स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति स्थानेः तरतमपरिभाषयैव तत्स्थस्थाभिपामि
त्यादिषु निर्वाहात् तदर्थं यथासंख्यसूत्रे नारब्धव्यमिति भाष्यमपि पदस्फोटवाक्यस्फोटौ तु इहैव प्रपंचकेऽस्य
नोऽवारितेनेति भाष्यप्रतीकमुपादाय कैयटेन भाष्यार्थे तथा वर्णितो । वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वेति व
दतां तयोरखण्डताप्युक्ता ॥ नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमिति तत्रैव भाष्ये सखण्डतोक्ता । मापा राम॰ ६

मि१ तं३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निष्कलं यं चेषु कैतवान्तराशिशुज्ञपो घ २ नेशे लभ्यं गेमीरां गे कूटमल्लिपान्न इत्यनेरागपस्पशापामेव प्रघट्टकां
नरे किं पुनरित्यादिभाष्यमपादाय केचिद्वर्णस्फोटं अपरे पदस्फोटं वाक्यस्फोटं चाहुरिति वदन्तो कैयटे नअ
इउण् इत्यत्र व्यक्तिस्फोटजातिस्फोटयोर्वेलावले चिंतयता प्रत्याहाराह्निकांते अक्षरं नक्षरं विद्यादिति भा
ष्यव्याख्यावसरे व्यवहारनित्यतानुवर्णपदवाक्यस्फोटानां नित्यत्वं तु जातिस्फोटस्यैवेति प्रतिपादयता अ (४ प्रत्याहाराह्निकांते
नुपदमेव ब्रह्मतत्वमेव हि शब्दस्वरूपतया प्रतिभातीत्यर्थ इति व्याचक्षाणेन सर्वे पक्षाः सूचिताः एवापदा
तअविवेके वज्ञातिरितिपक्षस्तदभिप्रायेण जातिस्फोटस्यापि व्यवहारनित्यतेति अक्षरं नक्षरं विद्यादित्यस्य
कैयटीये पाठान्तरं। आद्यंतौ टकितौ इति सूत्रे भाष्ये एव वर्णस्फोटपदस्फोटावुक्तौ। अखण्डमेव महत्तन्निष्प्र
त्ययविभागं तदर्थं चाश्रित्यैरेवागवयन्यायेन समस्तपदस्फोटस्य व्युत्पादनमभिप्रेतमिति तत्रैव कैयटः।
अर्थवदधातुः स्वं रूपं शब्दस्येत्यपरसूत्रकालस्येत्यादिसूत्रेष्वपि स्पष्टमिदं भाष्ये कैयटादावित्यलं वङ्ग्ना।
जाते च ब्रह्मात्मकत्वं उक्तं हरिणा। संबंधिभेदात्सैव भिद्यमाना गवादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा
यवस्थिताः तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्त्वतलादयः इति जा

(ब्रह्मसत्तैवतत्वार्थ ४२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्फोटस्यैवेनेत्यर्थः)

तेंस्फोटत्वमपि प्रघट्टकांतरे स्फुटं वाह्य । अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता । केश्चिद्व्यक्तय एवास्यां ध्वनि
त्वेन प्रकल्पिता इति । यद्यपीहाद्ये पक्षाउक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रंथकृतां । तत्रापि जातिस्फोट इ
त्यवधेयम् । सर्वे सर्वोपमर्द्देनैवान्तरेणान्तरेण पन्थास्तात्तानयाच प्रथमव्युत्पत्तेर्व्यवहाराधीनतया संप्रति स्वयाक्यस्य
विशिष्टे प्राथमिकः शक्तिग्रह इति निर्विवादं । सच वाक्यापोद्धाराभ्यामवयवानां शक्तिरिति त्वायोपष्टंभेन तत्कल्पनेइ
ति दर्शनोत्तरारंभं पंथाः । एकादेशादिस्थले उक्तरीत्या विनिगमनाविरहेण केषांचिन्मतेन पादिस्थले एवं लो
पाद्यभ्युपगमेन व्याकरणान्तोकलहे सति अवयवशक्तेरेव तु यपादतया प्राथमिकशक्तिग्रहस्य वप्रमात्र
प इति सैद्धांतिकः पंथाः । उक्तं च हरिणा । तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्यय इति । ब्राह्मणार्थो यथा नास्ति
कश्चिद्ब्राह्मणकंबले । देवदत्तादयो वाक्ये तथैव स्युरनर्थका इति च । एवं च स्थिते निपाता द्योतका विकर
णा अनर्थकास्त्यादि विचारोपि प्रक्रियादशायामेव । आह च । अड्डादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पने ।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः इति । तादृशोः ह्येवं इत्यर्थः । एवं च नामार्थयोरभेदस्यैव संसर्गः प्रत्ययार्थः
प्रधानमित्यादि व्युत्पत्तयोपि प्रक्रियाश्रया एव । उक्तं च । किं गर्भजन्यः किं गर्भकी दृश्यमानोति नेतिमते । विचारः फलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्सर्वैः प्रकृतिप्रत्ययाद्यत्र पदइति। आरोपितस्य पारमार्थिकेउपायतानविरुद्धा लिपिस्थलानुं धृतीशाखा
चंद्रादीनां लौकिकदृष्टांतानां अर्थवादवाक्यपंचकोशावतरणादीनां तंत्रांतरसिद्धानां पूर्वोत्तरसिद्धादीना
चैतच्छास्त्रसिद्धांतप्रागेवदर्शितत्वात्। नन्वेवंपक्षभेदेन अविशेषवृद्धेलेववास्फुटस्यैर्थौः स्फोटइतिव्युत्पत्त्यास्फोटइ
तिस्थिते। आहवाशास्त्रेषुप्रक्रियाभेदैरविद्यैवोपवर्ण्यतेइति। सत्यं नं सूक्ष्मभावानामनादिब्रह्मशास्त्रमिति
चानन्देवं वराटिकान्वेषणाय प्रवृत्तश्चिंतामणिं लब्धवानिति वाशिष्टरामायणोक्ताभाणकन्यायेन शब्दविचाराय
प्रवृत्तः सन्प्रसंगाद्द्वैतेऔपनिषदे ब्रह्मण्यपि सुतरां घटतामित्यभिप्रायेण भगवान्भर्तृहरिर्विवर्तवादादिकमपि प्र
संगाद्दुद्दपादयतानतु तत्त्वांतरे स्फुटप्रकृतेनातीवोपयुक्तं चेति नेह तन्यते॥ ॥इति स्फोटनिरूपणम्॥ ॥स्यादेत
त्। चैतलिरवचकारस्त्रुटितइत्यादिव्यवहारात् लिप्यावेव शब्दत्वभ्रमवतां तत्रैव वाचकत्वाभिमानवतां बालानां पुस्त
कमुपयुज्यते यथा तथैव भेदग्रहवतामपीति वक्तुं स्थितिः। एवमिहापि प्रकृत्यादिविभागे पारमार्थिकत्वाभिमान
वतामपि उपयुज्यते एव शास्त्रं तत्किमर्थं कल्पनाव्युत्पादनक्लेशः। अतएव हि भाष्यकारोपि शब्दोनित्यः अनित्यो
वेति विकल्प्य उभयथापि व्याकरणारंभस्य नित्यः प्रत्यहलाघवातपाल्लितिउदाहिष्यतेइतिचेत्। सत्यम्। व्युत्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संपर्वक्तोस्थितिः। कापित्वापक्षभेदेषु हि गौतमरेखाषु व्युत्पादितेषु तत्र तत्र विरुद्धतया भासमाना अपि सि
द्धान्तश्रेणी व्यवस्थापयितुं शक्यं तेषां स्वार्थपदव्याख्यानां पंचानां क्रमेण मानमित्यादिवक्ष्यमाणविकल्पनये
वोपपादयितुं शक्यत्वात् इति दिक्। ननु सत्कामात्तुशब्दो विषयः। अस्त्वेव मस्तु तिमन्यादिकल्पने यागव्युत्पा
दनोपपत्तिः। तथापि व्याकरणाध्ययनस्यानुष्ठापकं किमिति चेत्। नित्याध्ययनविधिरिति गृहाण। स्मर्यते हि
ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत्। का
र्यते अनुष्ठाप्यते ऽनेनेति कारणं फलं। ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यन्वयः। तथा च सांगवेदाध्ययन
तदर्थज्ञानरूपो यं धर्मो नित्यः संध्योपासनादिवदित्यर्थः। श्रुतिरेषेति हरदत्तादयः। स्मृतिरिति तु महाचार्याः
। तत्र यदि स्मृतिरेवेति प्रामाणिकं तर्हि आगमः खल्वपीति भाष्यप्रामाण्यलाभात् आगमस्य स्मृतिरेवेति व्याख्येयं।
अंगत्वं चांगत्वेन समस्तत्वात्। उक्तं हि शिक्षायां। मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते। निरुक्तं श्रोत्रमुद्दि
(समुदायः२ ष्टं छन्दसां विचितिः पदे। शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्त्र चक्षते इति। उपकारकतया पंगत्वं। व्याकरणं
हि अर्थविशेषमाश्रित्य स्वरविशेषादीन् विदधत् पदार्थविशेषनिर्णये उपयुज्यते। ज्योतिषमपि स्वाध्याये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयोगित्वं च कालविशेषं प्रति पादयति। नित्यत्वं तु व्याकरणस्यैव परिशिष्टप्रायं वाङ्मलकादिसाध्यानां नागमविका
रादीनां प्रायशस्त्वत्र संग्रहात्। छंदोविचितिरपि गणपत्यादिलक्षणद्वारा गणपत्यायत्ततामादिविध्यधीनतां
येऽउपयुज्यते। शिक्षापि वर्णोच्चारणप्रकारं दर्शयति। कल्पसूत्राण्यपि प्रकरणांतरपठितस्य न्यायबलस्यस्व
(संग्रहेण ४ शाखांतराधीतस्य चांगजातस्योपसंहारेण प्रयोगं दर्शयंति। तस्मात्स्वंगानि तेष्वपि प्रधानं व्याकरणं पदपदार्थावगमस्य
व्याकरणाधीनत्वात् वाक्यार्थज्ञानस्य तन्मूलकत्वात्। अत एव तस्य शिक्षायां मनुरवतेन निरूपणं कृतं। मन्वादिस्मृति
ष्वपि अंगाध्ययनविधयः प्रसिद्धा एव। तथा चाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापक इति स्थितं। तथा च संक्षेपासना
देरभावे प्रत्यवायः॥४ । अनुष्ठाने च पापक्षय इति यथाभ्युपेयं तेन तथा व्याकरणाध्ययनस्याप्यननुष्ठाने अनुष्ठाने च बोध्यं।
रक्षाप्रभृतीनि फलांतराण्यपि सन्ति। तथा च भाष्यं। कानि पुनरस्य प्रयोजनानि। रक्षोहागमलघ्वसंदेहाः प्रयोज
नमिति। अत्र प्रयुज्यते प्रवर्त्यतेऽनेनेति करणाल्युट्। प्रयोजयतीति कर्तरि व्युत्पत्त्या वाङ्कुलकाल्युट् जो वा। उभय
थापि प्रवर्त्तकविधिपरः पुल्लिंगः प्रयोजनशब्द एकः फलपरः क्लीबे अपरः। उभयोर्नपुंसकमनपुंसकेनेति नपुं
सकैकशेष एकवद्भावस्य वैकल्पिकतया प्रसिद्धं बहुवचनं। उत्तरे एकवचनं च बोध्यं। तत्रागमः प्रवर्त्तकः। रक्षोहला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र॰कौ॰ ९

ववासंदेहास्तत्फलानीति विवेकः।तत्र प्रवर्तक आगमो व्याख्यातः फलानि व्याख्यायंते तत्र रक्षा वेदसंरक्षणं।तथा
हि।भाषायामदृष्टा लोपागमवर्णविकाराश्छंदसि दृश्यंते।ते केवलप्रयोगशरणैः प्रामादिका इति संभाव्येरन्।
वैयाकरणस्तु लक्षणदर्शी तद्वेदरूपं स्थापयति।तत्र लोपोदाहरणं।त्मना देवेषु विविदे मित्रद्रु।त्मना आत्मने
त्यर्थः।मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः।आगमो यथा देवासः ब्राह्मणासः।आज्जसेरसुगित्यसुगागमः।लोपा
६१५ गमौ यथा देवा अदुह्र अदुहत इत्यर्थः।दुहेर्लङि झस्यादेशे कृते लोपस्त आत्मनेपदेष्विति तलोपः।बहुलं छंदसीति रु
डागमः।एतेन नाशिरं दुह्रे।विश्वा इत्येवे वीड्व इत्यादि लडंतमपि व्याख्यातं।वर्णविकारो यथा।गृभ्णामि ते सौभ
गत्वाय।हृग्रहोर्भश्छंदसि हस्येति वक्तव्यमिति भकारः।अन्येपि छांदसो स्तु यथा।उद्ग्राभं च निग्राभं चेति।उदि
ग्रह इति सूत्रे उद्ग्राभनिग्राभौ च छंदसि स्रुगुद्यमननिपातनयोरिति वचनाद्वन्निपूर्वाद्ग्रहेर्घञ्।तत्र उत्पूर्वात्सूत्रे
णलोकेपि सिद्धो घञ्।निपूर्वात्तु वार्त्तिकोक्तश्छंदस्येव।सन्निवेशविशेषयुक्ताः पात्रविशेषाः स्रुचः।इह तु जुहूपभृ
तोरेव ग्रहणं।उद्ग्राभं चेति जुहूमुद्यच्छ।प्रादिष्टं सा प्रकृतिः।यथा दर्शपूर्णमासौ।यत्र नोपदिष्टं सा विकृतिः।यथा सौर्यं चरुं
निर्वपेद्ब्रह्मवर्चसकाम इति विहितो यागः।तत्र वैकृतस्य विधेर्विषयभूतायां भावनायां करणीभूते यागे उपकारका प्र॰ ९

२ इति।निग्राभं चेत्युपयच्छतं निपातनात्। इति वचनात् भस्य कारादेशः प्राग्वत्।जुहोपित्र २
२ योजनं।तथाहि।यत्रांगजातं पूर्णमु २ ४

सं ३

कौक्षायां तन्मुरेव न प्राकृतमंत्रजातं प्राप्यते। वैदिके करणे ताहशानामेवांगानामपेक्षितत्वात्। तेषामेव प्रकृतौ क्लृ
प्तत्वात् सामर्थ्यलाभात्। तद्विशेषस्यैवैकदेवतात्वादिनाऽवकाशत्वात्। तस्मात्प्रकृतिवद्विकृतिः कर्त्तव्येति पूर्वमीमांसा
यां स्थितं। तत्र यस्यांगस्य प्रकृतौ य उपकारः क्लृप्तस्तस्य विकृतावभावे निवृत्तिः। यथा प्रकृतावववघातस्य वैतुष्य
मुपकारस्तथा क्लृप्तस्तस्य कृष्णलेष्वसंभववादववघातस्य निवृत्तिः मंत्रा अप्यंगानि तेषां चानुष्ठेयार्थप्रकाशनं
कार्य्यं। तत्र प्रकृतौ यस्य मंत्रस्य यदभिधेयं तद्विकृतौ साकल्येन नास्ति तदा कृत्स्नमंत्रस्य निवृत्तिः। यथा
अवरक्षो दिवः सपत्नं वध्यासमित्यवघातमंत्रस्य कृष्णलेषु। यस्यैकदेशस्याभिधेयं नास्ति तस्य तावन्मात्रे
निवर्त्तते। यथा अग्नये त्वा जुष्टं निर्वपामीत्यस्य मंत्रस्यावयवभूतं देवताभिधायिपदं औषधद्रव्यकत्वेन स
कदेवताकत्वेन चाग्नेयविकारभूते सौर्येपि निवर्त्तते। अग्निशब्दवल्लुप्तद्वारकतया निवर्त्तमाने एकारोपि नि
वर्त्तते। अकारान्तेतरप्रकृतिसन्निधाने नैव हि एकारस्य संप्रदाने वाच्ये अकारान्तानुपशब्दस्यानतश्चतुर्थ्यंत
सूर्य्यायेत्याद्युदात्ते अग्नय इत्यस्य स्थाने ऊहः। सोयं प्रकृतस्य ऊहः। लिंगस्य क्वचिदूहः। यथा देवीरापः
शुद्धाः स्थेत्यस्य प्रकृतिविनियुक्तो मंत्रः। तस्माज्जे ऊहः। देवाजसुद्धमसीति प्रत्ययमात्रस्य क्वचिदूहः। यथा। मेमेमासे

(राजसूर्यसूर्येति निपातितः क्यबंतः सूर्य्यः। अग्निसूक्तो लोदिकन्यन्तः २) {त्रिभी इत्यस्य लुङि रूपमिदं तत्र वृद्ध्यभावो)
(दिक्षोदसं १)

प्र०कौ०
१०

विकृष्याइतिपुरोडाशावदानमंत्रः।तस्यधानास्रुहः।कार्मैष्टमासंविजिश्वमित्रादिरितिहरदत्तादयः।पाणिकारुस्तंसंविग्न
मित्सहमाङ्कः।पुनंर्चैततामहतामिन्द्रतपाविजिचष्टष्यग्मावेहस्सप्रयोगोनतु ओविजीभयचलनयोरित्यस्मात्
वधारणात।लाघवमपिप्रयोजनंतत्पाहि।अध्यापनेक्वात्तरास्यदृत्तिः।तन्निर्वाहस्त्ववेदुष्याधीनः।वैदुष्यंचसाधु
साधुविवेकः।सचनप्रतिपदपाठादिनासंभवति।शब्दानामानन्त्यात्।तस्मादुत्सर्गापवादरूपलक्षणाद्वारात
होधनेलाघवं।अन्यथातुगौरवं।असंदेहोपिप्रयोजनंतत्पाहि।स्थूलपृषतीमनड्वाहीमालभेतेतिश्रूयते।तत्र
संदेहः कर्मधारयोवाबहुव्रीहिर्वेति।तत्रकर्मधारयपक्षेपृषतीशब्देनमत्वर्थलक्षणयापृषत्वतीविदुष्मतीगौरे
वाभिधीयतेस्थूलापिसैव।विदुनांतुस्थौल्यंतानवंवायथातथास्तु।बहुव्रीहौतुस्थौल्यंपृषत्स्वेवेति। गोस्तुस्थ
लाकृशावेत्यत्रनादरः।तत्रलकाराकारेउदात्तत्वंहस्वात्पूर्वपदप्रकृतिस्वरेणावेपाकरणाबहुव्रीहिर्निश्चीयेत्।
ततस्त्वनिश्चयेनप्रतिवेधान्वेशयानुत्पादः।सएवासंदेहः।अपीभावेऽप्यपीभावादसंदेहमितिस्यादितिचेन्न।यथोपे
णाभ्यपीभावतत्पुरुषसंज्ञाद्वयमपीहभवतीतिद्वितीयेउपपादयिष्यमाणत्वात्।अतएवाभयथापातुनिप्रयोगः।
अद्भुतापामसंहितमितिञ्थासंहितयेतिचाएवमिंद्रपीतसोपहूतस्योपहूतोभक्षयामीत्यादावपिस्वरेणैवबहु राम०
१०

(१इंद्रेणपीतस्येतितृतीयातत्पुरुषः३ऽतंइंद्रेणपीतःसोमोयस्मिन्सवनेइतिबहुव्रीहिरिति। संदिह्यस्वराज्ञिर्णयइतिस्फुटंतृतीयेद्वितीयपादे)

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रीहिनिर्वापेइंद्रपौनाधिकरणं अवैयाकरणान्प्रति सार्थकं कृत्वा चिंतान्यायेन वा नेयमिति। तदेवं रक्षोहलाघवासं
देहाख्यानि चत्वारि फलानि व्याख्यातानि। आगमस्त्व प्रवर्तक इत्युक्तं। भाष्ये तु संदर्भशुश्रूषार्थं फले चतुष्टय
स्य प्राकृपक्ष्याद्या प्रवर्तकेव त्वा येमध्येन दुक्ताफलसंदेशेन नित्यानामपि फलपर्यवसानमस्तीति सूचि
तं। फलं तु पापक्षयः प्रत्यवायानुत्पत्तिर्वा। धर्मेण पापमपनुदतीति। विहितस्याननुष्ठानान्निंदितस्य च सेवनात्।
अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीत्यादिवचनानीह साधकानीति दिक्। इमानि च यूपइत्यादिभाष्ये (पुनरर्थकं भयइति सांतमव्ययं ५)
णप्रवर्तकवचनांतराणि उदाहृत्य व्याख्यातानि तद्यथा। तेसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुस्तस्माद्ब्रा
ह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति ब्राह्मणं। अत्र न म्लेच्छितवा इत्यस्य विवरणं
नापभाषितवे इति। उभयत्रापि कृत्यार्थे तवेकेन केन्यत्वन इति तवै प्रत्ययः। धात्वनामनेकार्थतया निंदावचनात् म्ले
छधातोः कर्मणि घञ्। तेनापशब्दसामानाधिकरण्यं न विरुध्यते। अत्र न म्लेच्छितव्यमिति निषेधस्य तेसुराइ
(ह्यावकत्वमर्थवादत्वम्) त्यर्थवादः। न चेह रात्रिसत्रन्यायेन आर्थवादिकं फलमस्त्विति वाच्यं द्रव्यसंस्कारकर्मसु परार्थत्वात् फल (क्रत्वंगं कर्म २)
श्रुतिरर्थवादः स्यादिति न्यायेन अपापश्लोकं श्रवणाविति श्लोकस्य मात्रपरत्वात् प्रकरणात् क्रत्वंगत्वात् अपनिषे

(ज्योतिर्गौरायुरिति त्र्यहाभवंति प्रतितिष्ठंति ह वा य एता रात्रीरूपयंति २)

(यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति ०) २
(यद्गोक्तं [illegible]) २
(रात्रिसत्रे तु परार्थत्वाभावात् फलं कल्प्यते २)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रा०कौ० थइत्यर्थःयर्वाणस्तर्वाणोनामेत्यादावुत्तरग्रंथेभाष्यकारैरेवस्फुटीकरिष्यते।अतएवइहापिपरामृता।माभूमेत्यध्येयंव्याक
११ रणमितिनोपसंहृतं।किंतुम्लेछामाभूमेत्येवम्लेछातिघाः।शास्त्रबोधितविपरीतानुष्ठानादितिभावः।अत्रहेहेप्र
योगेहेहयोरितिप्लुतेप्लुतत्वप्रयुक्तेप्रकृतिभावेचकर्त्तव्येतदकरणान्म्लेछनमित्यर्थः।ननुसर्वःप्लुतःसाहसमन
निछताविभाषाकर्त्तव्यइतिभाष्यकृतावक्ष्यमाणत्वान्नैषदोषइतिचेन्नमतं।अतएवापरितोषाद्धाकाद्विर्वचनं
म्लेछनमित्यपरैर्व्याख्यातं।सर्वस्यद्वेइत्यत्रपदग्रहणस्यचोदितत्वादितितेषांभावः।ननुनेदंशास्त्रीयंद्विर्वच
नंकिंतुतात्पर्यद्योतनार्थमैछिकःपुनःप्रयोगः।अनावृत्तिःशब्दादनावृत्तिःशब्दादितिवदितिचेन्नहिआम्रेडि
तस्वरानुपपत्तेः।यदितुतत्राम्रेडितस्वरविनिर्मुक्तएवपाठस्तर्हिअरिशब्देरेफस्यलत्वंअपशब्दइत्यवधेयम्।
इदंचभाष्यादिषुप्रसिद्धइतिपाठमनुसृत्यव्याख्यातं।अयंचपाठःक्वचिच्छाखायामन्वेषणीयःमाध्यंदिना
नांशतपथब्राह्मणेतुहेलवोहेलवइतिवदंतइतिपठितत्वात्तस्माद्ब्राह्मणेनम्लेछेदितिपठ्यते।तत्रपकार
स्यातेवकारोऽपशब्दइतिस्पष्टमेवातएवशिक्षाकृतपठ्यते।मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थ
माह।सवाग्वज्रोयजमानंहिनस्तियथेन्द्रशत्रुःस्वरतोऽपराधादिति।स्वरेणस्वरतः।हीयमानपापयोगाद्वेति प्रा०
११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नस्मिं॥ मिथ्याप्रयुक्तः॥ यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन्। अत एव तमर्थं नाहे
त्यर्थः। वागेव वज्रः हिंसकत्वात्। यजमानं हिनस्तीति। यथार्थयुक्तनादेमाद्युज्यमाने धर्मोत्पत्तिः एवमधर्मयुक्तनादप
शब्दाद्युज्यमाने प्रत्यवाय इत्यर्थः। यथेन्दुदाहरणम्। इन्द्रशत्रुः। इन्द्रशत्रुशब्दः। पुरा किल विश्वरूपाख्ये त्वष्टुः पुत्रे
इन्द्रेण हते सति कुपितस्त्वष्टा इन्द्रस्य हन्तारं वृत्राख्यं पुत्रान्तरमुत्पिपादयिषुराभिचारिकं यागं कृतवान्। तत्र
च इन्द्रस्य शातयिता शत्रुः हिंसक इति यावत्। तथाभूतः सन् वर्द्धस्वेति प्रतिपादयितुं इन्द्रशत्रुर्वर्द्धस्वेति प्रयुक्तो। शपेता ति५
च्छेदेरौणादिकः त्रुन्प्रत्ययः। प्रत्रादिगणे निपातनाद्ध्रस्वः। इन्द्रशत्रुत्वस्याविधेयत्वान्न संबोधनविभक्तिः त्वं६
। तस्या अनुवाद्यविषयकत्वात्। अत एव राजन्युध्यस्व राजा भव पुत्रेत्यनयोर्वैलक्षण्येव प्रयोगः। राजत्वस्य सि
द्धत्वे संबोधनविभक्तिर्न तु विधेयत्वेपीति। एवं स्थिते इन्द्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्तेः तोदात्तेव क्रत्वप्रमादादाद्युदा
त्तः कृतः। तथा च पूर्वपदप्रकृतिस्वरेण बहुव्रीहिरर्थो लब्धः। इन्देर्हि धातोरौणादिके ऋज्रेन्द्रेत्यादिना रन्प्रत
ये कृते इन्द्रशब्द आद्युदात्तो व्युत्पादितः। तेनेन्द्र एवास्य हिंसकं संपन्न इति श्रुतीतिहासपुराणादिषु प्रसिद्धं। तदि
होदाहरणतयोक्तं। स्मादेतेनापत्रकर्मेणास्मेकस्कृतेनहभवितव्यं। सा च तत्पुरुषबहुव्रीह्योर्विशिष्टेति। अत्राहुः।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अपठितेषु २)

ग्र०क्रो० १२ जपादिपर्युदासेन मंत्रेष्वेवैकश्रुतिर्विधीयते। स्वेच्छया प्रयुज्यमानस्तु मंत्रो न भवति। नदुक्तं भेदलक्षणेऽस्मिन्निर्णीतं। अ
नाम्नातेष्वमंत्रत्वमिति। आपस्तंबसूत्राह। अनाम्नाता अमंत्रा यथा प्रवरोहनामधेयग्रहणानीति। अत एव मंत्रो ही
न इति पठितस्य शिक्षायां प्रसिद्धत्वेपि ऊह्यमानस्यामंत्रत्वापायपदेशस्तु रितिवाकाशिषोः सेगतः स्यादतो मंत्रश
द इह शब्दमात्रपर इत्याशयेन भाष्ये दुष्टः शब्द इति पठितं। ननु स्वाहेदं शत्रुर्वद्धस्वेति वेदपठ्यत एवेति चेत्। सत्यं।
ऊहितं पदं मंत्रत्वमूलमनुकार्यं तदनुकरणस्य पाठेपि अर्थपरस्यानुकार्यस्य लौकिकत्वानपायात्। नन्विदं शत्रु
शब्दस्य लौकिकत्वे कथं स्वरमपुक्तयोर्गुणदोषयोः प्रसक्तिः। स्वरस्य वेदमात्रविषयत्वादिति चेन्न। स्वरविधौ
छंदोधिकाराभावात्। एतावानेव हि भेदः। यत् छंदसि त्रैस्वर्ये एकश्रुतिर्व्यवस्थया विधीयते। लौकिके त्वैच्छि
को विकल्पः। अत एवैकश्रुत्या सूत्रपाठस्तु स्वर्यमाणेवेति पक्षद्वयमपि तत्र तत्रोप[illegible]मिति वक्ष्यामः। नन्वेव (इतिसूत्रे४)
ष्टे स्वरांवेति सूत्रावाह्निकस्यानुवृत्त्यैव सिद्धो विभाषाछंदसीत्यत्र विभाषाग्रहो व्यर्थः स्यात्। अप्रसक्तप्रतिषेधे त
नायदोषः। यत्नेकर्म्मणीत्यस्य निवृत्तये पुनर्विभाषाग्रहणात्। नन्वपर्युदासपक्षेऽप्येवमेवास्त्विति वाच्यम्। नित्य
विकल्पविध्योर्विषयभेदस्यावश्यकतया आरंभस्यानर्थ्यादेव तन्निवृत्तिसिद्धेः। प्रसज्यप्रतिषेधे तु नारंभस्यानर्थ्यं ऊहा ग्राम० १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिष्वमंत्रेषु चरितार्थत्वमस्त्वीति विधेस्तु मंत्रेणाङ्कं दोमात्रविषयकेणादोषसंभवात्। नन्वूहादीनां छंदस्त्वमस्ति। मंत्र
ब्राह्मणोत्तरत्वात्। तस्मादसमर्थसमासमन्त्राश्रित्यापि प्रसज्यप्रतिषेधश्चागत्यास्तोकत्वेनुमुचितमिति चेन्न। पर्य्यु
दासपक्षेपि मंत्रेनित्यं ब्राह्मणो वेति विषयविभागसंभवेन यज्ञकर्मनिरन्तरेपि विभाषाग्रहणासंभवात्। उ
क्तापरितोषादेवनाकेचिज्ज्ञापादिषु प्रसज्यप्रतिषेधमाश्रित्येहाप्येकश्रुतेः प्राप्तोसत्यांतदकरणं बहुव्रीहि
स्वरकरणं च स्वरतोऽपराधादित्यस्यार्थ इत्याहुः। श्रूयते चाप्यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शु
ष्कैधो न तज्ज्वलति कर्हिचित्। निगदेन पाठमात्रेण। शुष्कैध इति। सांतेन क्लीबेन रूपं एधः शब्देन अकारांतेन वा पु
ल्लिंगे न निर्वाहः। न ज्वलति न प्रकाशते निष्फलं भवतीत्यर्थः। निरुक्ते तु। अन्यापि ज्ञानप्रशंसा भवति अज्ञा
न निंदा च। स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थं। योऽर्थज्ञ इत्सकलं भद्रमश्नुते (इत्यसिद्धोरु)
सानं२ नाकमेति ज्ञानविधूतपाप्मेति मंत्रमुदाहृत्य यद्गृहीतमविज्ञातं निगदेनेत्यादि पठितं। तत्रापि गृहीतं शब्दतः। अविज्ञा
तं तु अर्थतः प्रकृतिप्रत्ययादिविभागेन वेत्यादिः शेषं प्राग्वत्। अन्यत्रापि श्रूयते। एकः शब्दः सम्यग्ज्ञातः सुष्ठु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५यद्यपि कुगतीति सूत्रे सुप्प्रकृतिहृत्य तिङ्ग्रहणापकर्षयोः सिद्धांतितत्वात्तत्र न समासप्राप्तिस्तथापुदात्तवतेतिवार्तिकात्। इह ते

शा०कौ० १३ प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। एतच्च एकः पूर्वपरयोरिति सूत्रे भाष्ये स्पष्टं भविष्यति। एतन्मूलकमेव कात्या
यनप्रणीतेषु भ्राजाख्येषु श्लोकेषु स्मर्यते। यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले।
सोऽनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैरिति। दुष्यति चापशब्दैरित्यत्र अवैयाकरणाः कर्ता
सामर्थ्याद्बोध्यः। यथा अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदे
त्। अयमहमिति। तस्यानुकरणं चानितिपरमिति गतिसंज्ञा। ततो गतिसमासेपि अस्य वासौ यमित्यादावि वा
नुकरणत्वादेव विभक्तेर्लुङ्न। याज्ञिकाः पठंति। प्रयाजाः सविभक्तिकाः कार्या इति। यद्यपि प्रयाजमंत्राः स
विभक्तिकाएव पठ्यंते तत्र याप्ययाधानादनंतरं यजमान उदरव्यथावान्स्याद्यदि वा संवत्सरमध्ये तस्य महती विप
त्स्यात्तदा नैमित्तिकीं पुनराधेयेष्टिं विधाय तत्रेदमाम्नातं प्रयाजाः सविभक्तिका इति। तत्र केवलविभक्तेः प्रयो
गानर्हत्वात्प्रकृतिराक्षिप्यते। सा चाग्निशब्दरूपा। ननु याका चित्तानि नुक्ते देवताकांडे अपकिं देवताः प्रयाजा
नुयाजा इति प्रश्ने समनवतार्थमंत्रवर्णादीनुदाहृत्य आग्नेया इति [redacted] तु स्थितिरित्युपसंहारात्। तस्मादादित ष्च तु रमा० १३

इति सिद्धांतनात्रिपयोपधः ५) प्रकृतौ ५

भर्त १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स२

ष्ठु प्रयाजेषु चतस्रो विभक्तयोऽग्निशब्दप्रकृतिकाः पठ्यंते इत्यादि श्रौतग्रंथेषु द्रष्टव्यं। न चान्यत्रापि। यो वा इमां पद
शः स्वरशोऽक्षरशो वाचं विदधाति आर्त्विजीनः इति। पदं पदमिति संख्यैकवचनाद्वीप्सायामिति शसः। स्वर उदात्ता
दिः। अक्षरं व्यंजनसहितोऽच्। ऋत्विजमर्हतीति आर्त्विजीनो यजमानः। ऋत्विक्कर्मार्हतीति आर्त्विजीनो याजकः। य
र्त्विग्भ्यां घखञाविति सूत्रेण यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानमिति वार्त्तिकेन खञ्। यजने याजने च
विदुषस्त्वाधिकार इति भावः। ऋग्वेदेपि बहवो मंत्रवर्णाः। चत्वारि शृंगा। चत्वारि वाक्। उत त्वः पश्यन्। सक्तुमिव सा
दयः। तितउ परिपवनं भवतीति भाष्यं। [illegible]लनीति तितउः पुमानिति अमरस्य प्रमाद इत्येके। वस्तुतस्तु भाष्यानुरोधा
दमरग्रंथेपि पुंस्त्वायोगमात्रं व्यवच्छेद्यं न तन्ययोगोपि। तथा च पुंनपुंसकवर्गे स्याद्वालुकि हिं गुं इति त्रिकांडशेषः। अत एव
तितउमाचष्टेति ता पृथक्तोऽभियुक्तग्रंथा अपि संगच्छंते इति दिक्। याज्ञिकाः पठंति। आहिताग्निरपशब्दं प्रयुज्य
प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। तथा दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यंतरंतस्थ
मवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं नाम कृतं कुर्यान्न तद्धितमिति। नाम

तित ५४

(सरस्वदेवतांर)

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति३

श०कौ० कारकेअधिकारिणः पितुर्यत्र यः पुत्रुषाभ्यां ननु कापत्ति अभिधत्ते इति त्रिपुत्रुषान्तकां अन्येषामपि दृश्यन्त इति दी
१४ र्घः। त्रिपुत्रुषमित्यत्र पात्रादित्वात् स्त्रीत्वाभावः। मूलविभुजादित्वात्कः। ननु उपपदाविवक्षया आतश्चोपसर्गे इति
कं कृत्वा ततः षष्ठीतत्पुरुषः। ननु कर्मण्यणि इति सूत्रे अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेति वार्त्तिकस्य
न दीप्तत्वेऽस्य प्रत्याख्यातत्वात् मूलविभुजादित्वात्क इति भाष्यस्य च अननुगुणो। अत एव गोगाधरादिशब्दानां संज्ञाशब्द
त्वमिति प्राचः। वस्तुतस्तु प्रथमं कर्माविवक्षायामन्तकपदं व्युत्पाद्य पश्चात् कर्मसंबंधे प्रदोषः। वार्त्तिकादिकं
तु प्रथममेव कर्मविवक्षामभिप्रेत्य। अन्यथा कृतपूर्वीत्यादिषु का गतिः। अत एव शकं च क्षुद्रुपहं तुमिति भाष्यव्या
ख्यायां बहिरंगस्त्रीलप्रतीत्या अंतरंगः पदसंस्कारो न विहन्यत इति कैयटोपि वक्ष्यति। विवक्षा च लोकप्रसिद्ध्य
नुसारिणी न तु स्वायत्तेति विपराभ्यां जेरित्यादावुपि परत्वे धातुसाधनेन युज्यत इति पक्षमुपष्टभ्य विजयतीत्यादिना
पादनीयमिति दिक्। तथा च ऋग्वेदः एवं पठ्यते। स देवो असि वरुणा यस्य ते सप्त सिंधवः। अनुक्षरन्ति काकुदं सूर्म्यं सु
षिरामिवेति। अस्यार्थः हे वरुण त्वं सत्यं देवोसि। यस्य ते काकुदं तालु काकुर्जिह्वा सा उद्यते उत्क्षिप्यते अस्मिन्निति काकुदं। राम०
१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वदे तु ल्क्षे पणामर्थः। धातूनामनेकार्थत्वात्। तेनो यत्रैर्येक विधानमित्यधिकरणे कः। संप्रसारणं षष्ठीत्यनुवृत्तेः पेशकं ह्वा
दितात्परत्वे पं। गुदेप्र रणे इत्यस्मादधिकरणे कः। पृषोदरादित्वान्तु शब्दस्य लोप इत्यन्ये। निरुक्तस्त्वनसोऽप्यवे। सप्तसिंध
व इव सिंधवो विभक्तयः। अनक्षरं तितालु प्राप्यप्रकाशं तेइत्यर्थः। अत्र दृष्टांतः। यथा सच्छिद्रो लोहमयीप्रतिमां प्रवि
श्याग्निः प्रकाशते न तथेति। अग्निर्हि तत्रत्यं मलं भस्मीकृत्य प्रतिमां शुद्धां करोति तथा विभक्तयोपि शारीरं पापमपाकुर्व
तीति भावः। स्थूलैरित्यरगापः प्रतिभिन्नमरः। स्थूर्यते चास्मैर्जिव्हलं तीमालिंगेन्मत्वे गुन्नुतत्यागइति। अभिसर्वइत्यत्र वा
छंदसीत्यनुवृत्ते पणादेशः। स्कषिरुमित्यत्रार्श आद्यच्। अभेदोपचारो वेत्याहुः। वस्तुतस्तु उषस्कषिमुक्तमधार
इति मत्वर्थीयो रः। रंध्रं च्छिद्रं वपास्कषिरित्यमरः। सरंध्रं स्कषिरं त्रिष्विति च। सुष्ठु स्यतीति सुषिरि इति क्षीरस्वामी। गर्तेर्गर्त्ता
न्विते वाद्यविशेषे सुषिरं त्रिष्विति शाश्वतः॥ ॥इति प्रयोजनप्रपंचः॥ ॥इत्थं विषयप्रयोजनयोरुक्तयोः संबंधाधिका
रिणाववुक्तप्रायावेवेति दृष्टव्यं तो क्तौ। इह येन प्रयोजनं एवं तनोत्यर्थ एव न तस्य इत्यं प्रत्यवतिष्ठते। ननु यथा अधीत्या
चार्येण क्तेः प्रयोजनप्रसमक्तं त्वेववेदमधीयते। नहि दंगम तं व्याकरणमप्यध्येष्यंते। तत्किं प्रयोजनवर्णनक्लेशेनेति।

श्रं१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श०कौ० अवेदस्मत्तं। प्रायेणोदाहृतानीतनानां मत्वाप्युक्तत्वाद्द्विप्रवकुलत्वाच्च प्रधानभूतो वेदस्तावदर्थज्ञस्तेन तदध्ययनकाले च
१५ बाल्यात्प्रयोजनादिकं प्रष्टुमसमर्थः शिष्यो गुरुणा उपदिश्यमानं वेदं गृह्णातीति युक्तं। न तथा गृहीतवेदाः प्रौढिमा
पन्ना विवाहार्थलक्षणानां व्याकरणाध्ययनाय गुरुणा प्रेर्यमाणा अपि तत्सहसा प्रवर्त्तेरन्। वेदान्नो वैदिकाः शब्दाः
सिद्धा लोकाच्च लौकिकाः। अनर्थकं व्याकरणमिति च प्रत्यवतिष्ठन्ते। तान्प्रति युक्तमेव प्रयोजनादिवर्णनं। एवं क
ल्पेषु तु व्याकरणशिक्षादीनि लक्षणानि प्रथमं पाठयित्वा तत्तल्लक्षणानुसंधानपूर्वकं लक्ष्यभूतं वेदं ग्राहयंतः
अ५ स्थिताः। तदा परं बाल्यावस्थायां व्याकरणपाठात्प्रयोजनप्रश्नविरहितत्वात्प्रतिपादनमपि न कर्त्तव्यमेवेति। यद्यपि श्रा
वणीं प्रौष्ठपदीं वाप्युपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत मासान्विप्रोऽर्द्धपंचमान्॥ ततः परं तु छंदांसि शुक्लेषु
नियतः पठेत्। वेदांगानि रहस्यं च कृष्णपक्षेषु संपठेदिति मनुवचनस्य इत ऊर्द्ध्वमनध्यायेष्वंगान्यधीयीतेत्यादिस्मृत्यंत
राणां च पर्यालोचनया वेदवेदांगाध्ययनस्य समकालता लभ्यते। तथापि ऋषिवचनत्वाविशेषाद्भाष्यकारोक्तेर्मानवा
देश्च व्रीहियववद्विकल्प एवेति तत्त्वं। तदेवमनुबंधचतुष्टयस्य सत्त्वात्साधुशब्दव्युत्पादनं कर्त्तव्यमिति स्थितं। तत्र सि०
१५

(विषयप्रयोजनसंबंधाधिकारिरूपस्य १)

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमिदं साधुत्वं साधयति बोधयतीति साधुरिति व्युत्पत्त्या बोधकत्वं तदिति चेन्न । गाव्यादावपि तत्सत्त्वात् । शक्तत्वं तदिति
चेन्न । पचतीत्यादौ विकरणानामसाधुतापत्तेः । तेषामनर्थकत्वात् । डुपचष्पाके इत्यादीनां साधुतापत्तेश्च । लाक्षणिके
ष्वव्याप्त्यापत्तेश्च । तेषामपि लक्ष्येऽर्थे शक्तेः क्वचिच्छक्ततायास्तु अश्वादिषु अतिप्रसक्तेः । वृत्तिमत्त्वं तदिति चेन्न । द्यो
तकेषु निपातेष्वव्याप्तेः । औपसेदानिकीमात्किरेव द्योतनेति चेन्न । प्रोत्तरजित्वघात्तरटलपोरविशेषेणाविनिगमना
विरहाच्छक्ततापत्तेर्व्याप्त्यसत्त्वश्च निशक्तौ विप्रांते । ततश्च अड् द्विर्वचनाद्यनवस्थापत्तेः । न च जातिविशेष एव साधुते
ति वाच्यं । कत्वादिना संकरापत्तेरिति । अत्राहुः । अनपभ्रष्टत्वं तादिपदाभ्युदययोग्यता । व्याक्रियायां जनीयावाज्ञातिः
कायीह साधुरिति । अस्यार्थः । शक्तिवैकल्यादिप्रयुक्तो अन्यथोच्चारणमपभ्रंशस्तत्ता तद्विरहोऽनपभ्रष्टत्वमेव साधुता सा च
र्थविशेषान्तर्भावेनैव । तथा हि समर्थशक्त्या लक्षणया वा बोधयितुं द्योतयितुं वा यादृक् शब्दोऽनादिः प्रयुक्तः । तस्मिन्नर्थे
दोषादन्यथोच्चारणं शक्तः सोऽसाधुः । अन्यथा तु साधुरिति । येऽपि गाव्यादिष्वप्रपभ्रंशत्वमन्ये तेन त्वाच्य युंजते तेषामप्यन्यथो
च्चारणमस्त्येवा तत्र च दोषप्रयोज्यतास्त्येवा तत्त्वमयोग्यमा यत्नमसत्वात् । यद्वा अनादित्वं साधुता । अनादिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अपूर्व
य

शा॰कौ॰ तुष्टोकेभावप्रधानोनिर्देशः।आदेशभावोऽनादिरितिवा।असंदेहइतिवचनात्तुतुष्टः।अभ्युदयोपयोगितावाऽस्तुसाधुत्वाव
२६ लंतत्त्ववत्त्वशास्त्रपरिशीलनशालिभिर्गम्योजातिविशेषोवेति।यत्तुजातिसंकरइत्युक्तं।तन्न।गुणागतजातेनस्था
दोषत्वात्।तन्नपाहि।यस्यदेवदत्तादेरनोष्मावर्णानेवंपूर्वमुक्तानांसस्यकुमारादिष्ववहितस्यओष्मवर्णेषुश्रुतेषुपद
नुमानेज्ञापकेनदोष्मानोऽसाधारणतदनुमापकज्ञानसंगीकारेसमेवघटते।नतुतत्रव्याप्यतानाजातिस्वीकारे।
ओष्मवर्णेष्वसाधारणजातेःप्रागगृहीतत्वेनानुमितिसामग्रीवैकल्यात्।तावत्कालतत्कउपाधिसंकरवदेवजातिसं
करोपिसर्वत्रास्तु।दूषकताबीजानिरुक्तेः।विनिगमकाभावेनभूतत्वमूर्तत्वयोरिवशरीरत्वपृथिवीत्वयोर्हेतोरपिजाति
त्वमंगापत्तेश्चानस्माच्चतुर्विधमपिसाधुत्वंनिर्दिष्टं।व्याकरणैकगम्यंवा।एवम साधुत्वमपिचतुर्द्धा।अपभ्रंश
तासादितामत्त्वावायपोग्यता।तदवच्छेदकजातिविशेषोवेति।हिंसादिसंसारस्यापिपुण्यपापजनकतारूपसा
धुत्वासाधुत्वेनतत्तत्पापिअनपभ्रंशतारूपंसाधुत्वमस्त्येवातदेवानुशासनप्रवृत्तावुपयोगि।अपेरनादिरितीत्रनि
र्देशात्तुतंकस्मात्तद्भवतीत्यादिभाष्यात्स्वरसात्।एवंचानादित्वमभ्युदयोपयोगित्वंवाअनपभ्रंशत्वमात्रेणानासिद्ध राम॰
२६

ति। किं तु पौरुषेयसंकेतविरहविशिष्टत्वेनेत्यवधेयम्। तदेतदुक्तं यास्केन। स्वेच्छया संज्ञाः क्रियन्ते टिघुभाद
यः। कथं तर्हि तासां साधुत्वं नैव ताः साधवो मताः। अनन्यशक्त्यपलाल्लाघ्याऽऽस्मानपशब्दताहन्त वेत्ता यथा
लोके तथा संकेतिता इमाः। तन्नस्त्वासां प्रयोगेऽभ्युदयः प्रत्यवायोपि वा भवेत्। लाघवेनार्थबोधार्थं प्रयु
ज्यन्ते तु केवलमिति। तदयं निर्गलितोऽर्थः। यास्केन स्वेच्छया संज्ञाः क्रियन्त इति पक्षे। अनादिं प्रथमाः
न५ शब्दाः साधवः परिकीर्तिताः। एवं शक्तिवैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः पुंभिरपशब्दा
इतीरिताः इति च साध्वसाधुलक्षणे आम्नायमानतो टिघुभादि[illegible]नां साध्वसाधुबहिर्भावः स्यादेव तेषामप्य
नादित्वेति पक्षे च तद्विधापि प्रागुक्ता साधुतास्त्येव। उक्तं वा व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्। नि
त्य एव तु संबन्धो डित्थादिषु गवादिवत्। वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः। अकृत्रिमोऽभिसं (पा॰ [illegible]क्तिसंकोचो लक्षणः ३)
बन्धो विशेषणविशेष्यवदिति। पक्षद्वयेपि अनुशासनविषयतानिर्विवादेति। नात करणेऽल्पविशेषः। हन्
त कुर्यात् तद्धितमिति ज्ञापकादिग्घुसत्त्वाविरोधिनामेव साधुता। तद्विरोधिनां तु देशभाषानुसारेण क्रियमाणा

(बहिर्भूतत्वे निर्देशादिना सा। साधुत्वे तु तत्त एव २)

नोकुर्वीमंचीत्यादिनामधेयानामसाधुत्वेवानदेततदुल्लकस्तत्रैववार्त्तिकव्याख्यावसरेस्फुटीकरिष्यते॥ ॥इतिसा
धुत्वनिर्वचनं॥ ॥व्युत्पादनंचप्रकृतिप्रत्ययादिकल्पनयाउत्सर्गापवादलक्षणैर्वानतुसाधुसाधोर्वाअनन्तरस्यवा
प्रतिपदपाठेन।शब्दानामानन्त्येनतदसंभवादित्युक्तं।स्यादेतत्।लक्षणप्रणयनमपिकिंजातिपक्षमाश्रित्यउत
व्यक्तिपक्षं।आद्येसकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेतिनसिद्ध्येत्।तथाहिजातौपदार्थेद्वयोर्विध्योःपरस्प
रपरिहारेणतज्जात्याक्रांतव्यक्तिविशेषेचरितार्थयोःक्वचिदेकत्रप्रसंगेपरस्परप्रतिबंधादप्रतिपत्तिरेवस्यात्स्व
प्रतिपक्षवत्।तथाचवक्ष्यति।अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति।तत्रचविप्रतिषेधसूत्रेविध्यूर्ध्वेपरंतावत्प्र
वर्तीति।तस्मिंश्चकृतेयदिपूर्वस्यनिमित्तमस्तितर्हिभवत्येवतत्।यथाभिंदकीत्यत्रभिनद्धिहिइतिस्थितेपरत्वाद्वि
भावेकृतेपुनःप्रसंगविज्ञानादकच[illegible]भवति।एवंजातिपक्षेपुनःप्रसंगविज्ञानंयद्यपिसिद्ध्यतितथापिसकृद्ग
तावितिनसिद्ध्यति।तथाचतृंक्तान्नमित्यत्रतृंक्हिइतिस्थितेश्नमावृद्धिंबाधित्वापरत्वात्तान्नतङिःकृतेस्थानिवद्भा
वेनस्यादेवविधिः।व्यक्तिपक्षेतुसकलव्यक्त्युद्देश्यकशास्त्रस्यप्रत्येकंतत्रेचरितार्थत्वासंभवाद्विकल्पप्रसंगोनि

स्प१

पर्य्याप्तिस्तत्रैपरमेवभवति। ननुएवंमितिज्ञानयोर्येनस्तत्त्वेलेननत्वएवंलक्षणस्यव्यक्तौतन्मात्रविषयकत्व
कल्प्यतेइतिएतन्नव्यक्तिविषयकलक्षणाभावरूपपर्य्यवसानं। तथाचव्रुडुन्तास्त्वमित्यादेःसिद्धावपिभिंध
कीत्यादिव्यक्तिपक्षेनसिद्ध्यति। तस्मादशक्यमन्तरा पक्षात्प्रयोगेनलक्षणाप्रणयनमितिचेन्न। अ
नएवलक्ष्यानुरोधात्लक्षद्वयमप्यास्त्रीयते। क्वचित्कस्त्रिन्नेहार्थेइतिजातिवादिनामयमभावः। लाघ
वाज्जातिर्वाच्या। व्यक्तौनानात्वेनानन्तासांवाच्यत्वेगौरवं। वाहदोह्याद्यन्वयस्तल्लक्षितायांव्यक्ताविति। व्यक्ति
१५ वादिनस्तावद्भः। अनुपपत्तिंविनापिव्यक्तिप्रतीतेरनुभवसिद्धत्वाद्व्यक्तेर्वाच्यत्वप्रत्ययादिकंविनाज्ञा
तेःप्राधान्येनाप्रतीतेश्चवाहाद्यन्वयोपपत्तेश्चममजसः। परन्तुव्यक्तीनानात्वेसमिति। नैतद्बाधकं। शक्य
तावच्छेदिकायाजातेरैक्यात्। नन्वेवंजातेरपिवाच्यत्वमायातमितिचेन्न। अकार्य्यत्वेपिकार्य्यतावच्छेदकत्व
लै२ वदशक्येपिशक्यतावच्छेदकत्वसंभवात्। अतएवलक्ष्यतावच्छेदकेलक्षणानेतिनैयायिकाभ्युपगमः। त
स्माज्जातिरुपलक्षणंव्यक्तिमात्रेवाच्यमिति। परन्तुसत्त्रूपस्तत्रैभाष्येवक्ष्यतेतेनसाहतिपदार्थकस्मद्द्वं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियोगेनविकल्पेनद्वेवासहसमुच्चिते।संबंधःसमुदायोवाविशिष्टावैकयेतरेति२

शा०कौ० १८ नपदार्थइत्यादिननुजातिव्यक्त्योरन्यतरेणविशिष्टस्यापरस्यवाच्यत्वेस्मिंस्तूपंमतांतरमातष्याचाहुत्यधि
करणभंदेतुमतेविकल्पेनद्वेवासहसमुच्चितेसंबंधःसमुदायोवाविशिष्टानियोगेवैकयेतरेतिनत्रव्य
क्तिरेवजातिरेववाच्येतिइहतुमतद्वयंनियोगेनत्वनेनोपनिबद्धंचतुर्थचरणेनतुसत्रपस्तत्रोक्तंमत
द्वयमुपनिबद्धमितिविवेकः।यद्यपिजातिव्यक्तिपक्षयोरन्यतरस्यन्यायेनबाधआवश्यकस्तथापी
हशास्त्रेसंज्ञापरिभाषादिवल्लक्ष्यसिद्ध्युपायतयाउभयोराश्रयणंकिमपिबाधकंनास्तीत्यवधेयम्।ननुत्
भंहोकाष्टपक्षीमध्येविकल्पेनेतिनतीयःपक्षोत्रप्रक्रियादशायांस्थितः।विकल्पस्तुलक्ष्यानुरोधाद्व्यवस्थितो
नत्वैच्छिकइत्यन्यदेतत्।समुच्चयपक्षंचतुर्थमाश्रित्यापिक्वचित्कस्यचिद्विवक्षाअपरस्यत्वविवक्षेतिगृहीत्वा
प्रक्रियानिर्वाहंसुकरइतिदिक्।यदिहिव्यक्तिरेवेत्येतत्स्याद्वार्त्तिकंसारूप्यंहिजात्याख्यायामितिसूत्रंनारभेत।
यदिवजातिरेवेतितर्हिसरूपसूत्रंनारभेतेतिभाष्यं।ननुयस्मिन्पक्षेर्थवान्वृक्षस्तत्रापिलक्षणयाजातिपर
त्वेइहात्राःसंनीतिप्रयोगसाधयितुंजात्याख्यायामितिसूत्रमस्तुतयाजातिपक्षेपिनानार्थानुरोधात्सरूप शा० १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(विरुद्धाभ्यर्थां यथा तां व्यजीतेषु समया नहूषेत्तु नानीके धिति यावत् १)

।सत्यं।

सूत्रमस्तु। वक्ष्यति हि वार्त्तिककारो येषु चमुक्तसंशयमिति॥ लक्ष्यानुरोधश्च व पक्षद्वयाश्रयेण शरणं। अनतर
वेदाहृतसूत्रयोर्भेदकृतापत्ताख्यासमानत्वेप्रदोषः। इदानीं वार्त्तिककारः शास्त्रस्य नियमविधिरूपतया
सार्थकतामाह। सिद्धे शब्दार्थसंबंधे लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु। लो
कादेव हि प्रथममवगतिः। अव्युत्पन्नप्रतिव्याकरणादीनामप्रवृत्तेः। अर्थवद्धातुरित्यादिहि व्याकरणे शक्तिग्रहो
पजीवकं। तथा च समर्थसूत्रेऽपि वार्त्तिकं। अर्थानादेशनादिति। अनेकमन्यपदार्थ इत्यादिकं हि लोकसिद्धमर्थम
नुवदसाधुत्वाख्यानपरं। ततश्च लोकादेव शब्देऽर्थे तयोः संबंधे च सिद्धे अर्थबोधनाय शब्दप्रयोगे ऽपि प्रसक्ते गवादय
एव प्रयोक्तव्या न तु गाव्यादय इति नियमार्थं शास्त्रं नियमफलं तु धर्म्मः। तत्रास्मान्नौ दृष्टान्तः। प्राङ्मुखोन्नानि भुं
जीतेत्यादि लौकिकशब्देनोक्तः। व्रीहीनवहन्तीत्यादिश्च वैदिकशब्देनोक्तः। धर्मनियम इति च षष्ठीतत्पुरुषः। अ
श्वघासादिवत्। न च चतुर्थीतत्पुरुषः। प्रकृतिविकृतिभावविरहात्। ननु पदानि प्रयुक्तानामिदमन्वाख्यानं न तर्हि कि
मर्थमप्रयुक्ता अपि ऊषतेरचक्रमेतस्माद्यौ व्युत्पाद्यन्त इति चेन्न। आपि ज्ञानं विना अप्रयुक्ततायादुरवधारणा त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(किंस्विदावपनं महत् भूमिरावपनं महत् इति प्रश्नोत्तर ग्रंथविशेषः २)

धार थर

शा०कौ० १९ तां महान्हि प्रयोगविषयः। तथा च भाष्यं। सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्याः बहुधा भिन्नाः ए
कशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं। नवधाऽथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं
वैद्यकमित्येतावान्प्रयोगस्य विषय इति। बह्वृचानामाम्नायो बाह्वृच्यं। छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्य इ
ति ञ्यप्रत्ययः। चरणाद्धर्माम्नाययोरित्युक्तत्वादाम्नाये। अथर्वणा प्रोक्तो वेदोऽथर्वा उपचारात्प्रयोग इत्येके। वसंता
दिषु अथर्वन् आथर्वणाः इत्युभयोः पाठसामर्थ्यात्प्रोक्तप्रत्ययस्य वा लुगिति तु न तत्त्वं। अत एव भाष्यं वक्ष्यते। तेन
प्रोक्तमिति प्रकृतस्य ऋषिभ्यो लुग्वक्तव्यः। वशिष्ठोऽनुवाकः। ततो वक्तव्यमथर्वणो वेति। तमधीते आथर्वणिकः वसं
तादित्वाट्ठक्। दांडिनायनेत्यादिसूत्रे निपातनाट्टिलोपाभावः। आथर्वणिकस्याम्नाय आथर्वणः। आथर्वणिक
स्येकलोपश्चेति आथर्वणिकादणः तस्मिन्नियोगेन कलोपश्च। प्रकृतमनुसरामः। एतावंतं प्रयोगविषयं पर्यालो
चयितमशक्तेरप्यस्मदादिभिर्लक्षणानुगतानां प्रयोगाणामनुमेयत्वात्। अस्ति च लोके दाहनानामपि वेदप्रयोगः।
समासेष्वनौ रेवद्रूपमित्येतरे ऋतं ब्रह्मचक्रा। यत्रानश्वकाजरसं तनूनामिति। ननु लक्षणे योऽयं दिनानां दिना शा०कौ० १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शो२

सिद्धिस्तर्हि वचनीत्यादेनामपि स्यादिति चेन्नानहि वचिरंतिपरः प्रयुज्यते इत्यभियुक्तानामविगीतव्यवहारेण सामान्यशा
स्त्रस्य संकोचात्। अभ्युपगतो हि विषयविषयिणापापतितस्य कर्मानधिकारस्य त्वाऽग्निहोत्रादिष्कृतीनां संकोचः वि
शेषविषयेण शिष्टाचारेण सामान्यस्य तेः संकोचस्य तदुक्तो आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति। यत्र तु अप्रयो
गः संदिग्धः शास्त्रानुगमश्च तत्र निष्प्रत्यूहमनुमानं। तदुक्तं। यथा लक्षणमप्रयुक्ते इति। अप्रयु अनिश्चितप्रयोगे इत्य कौ ४
र्थः। निश्चिताप्रयोगे तु लक्षणं न प्रवर्त्तते एवेति निष्कर्षः। नन्वेवं ब्राह्मणो ब्रवणादिति कल्पसूत्रप्रयोगेणापि विशेषवि
षयकाचारेण ब्रुवो वचिरित्यादीनां संकोचापत्तिः। त्रिशंकादयाज्यया जनेनापि स्मृतिसंकोचापत्तेस्तुल्यत्वात्। तत्र धर्मेबु
आनुष्ठानेनास्तीति चेत्। इहापि साधुत्वबुद्ध्या प्रयोगो नास्तीति तुल्यं। यर्वाणस्तर्वाण इति वदभियुक्तानामपि असाधु
प्रयोगस्य कृतो वेहि नुपपत्तेश्च। अत एवेतिहासपुराणादिष्वपशब्दा अपि संतीति हरदत्तः। नर्दिमन्नासूत्रे भाष्ये पिस्प
ष्टमेतत्तदकोविदः। आर्षप्रयोगेष्वपि छंदसि विहितस्याख्यातस्य प्रवृत्त्या साधुत्वे समर्थ्यते। न च गौणमुख्यन्यायेन मुख्य छंद
स्येवतत्प्रवृत्तिः। स्वरितत्वप्रतिज्ञया तद्व्याख्यानवक्षतिहि स्वरितेनाधिकार इति सूत्रे विशेषणविशेष्यभाविकंकाप्यमिति। गौण राम०

(स्वरितेनेति सूत्रे भाष्ये कारिकाखंडमिदं। विशेषणायेत्यस्य गोणसंग्रहायेत्यक्षरार्थस्तत्रह गोणसादिना १)

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(विधिरत्यंतमप्राप्तेनियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते।२) (शशकश्शल्लकी गोधा खड्गः कूर्मश्च पञ्चमः।२)

शा० कौ० २० सुखयन्त्याकोहि स्वरितत्वमतिशास्यलेन प्रवर्त्तते इत्यर्थः। उपपादयिष्यते चेदं। अत एवाषित्वात्साधुतेति तत्र तत्रोद्घोषः
संगच्छत इति दिक्। यद्यपि अप्राप्तांशपूरणफलको नियमविधिः इतरव्यावृत्तिफलकस्तु नित्यप्राप्तिविषयकः परिसं
ख्याविधिरिति पूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीह शास्त्रे परिसंख्यापि नियमशब्देन व्यवह्रियते। तेन पंच पंचनखा भ
क्ष्या इत्यस्य नियमोदाहरणतया उपन्यासो न विरुद्धः। न चासौ मांसभक्षकरीत्यापि नियमो भवत्विति वाच्यं। पंचातिरिक्तभ
क्षणे प्रायश्चित्तविधेरसंगतत्वापत्तेः। पंचानामभक्षणे प्रायश्चित्तापत्तेः। गृह्येपि निवसन्विप्रो मुनिर्मांसविवर्जनादिति
पवकरत्यत्र वृद्धिप्रतिषेध इति चेत् शृणु॥ णापयतेर्ण्वुलि यस्य हल इत्यत्र अग्रहृ धीरम थ्वीदित्यादिना राम

धी

रराणाययपस्येति संघातग्रहणोपि अत्र दिं परस्येति हल्मात्रलोपे कृते तेनो लोप इति एरथ यगलोपे तस्य स्थानिव
द्भावे न णौ चङ्कारोपेन वृद्धिः॥ न लिड्हन धातुलोप इति सूत्रस्य कश्चिदपि व्यापारः॥ यङ्गं तानाम्नलुलितुप
पाचकरति भवत्येव वृद्धिर्नो नावेति वृत्त॥ एतेन न धातुलोप इत्यत्र इकस्यनुवृत्तेः पापाचक इति वदन्नधा
तुसूत्रे वेभिदिता मरीमृजिते त्युदाहरं अकोमुदीकारः परास्तः॥ एरथ यगलोपस्य न्याय्यत्वे भाष्यादिसंम
तत्वे च सति वेद्रे संभवात्॥ अत एव वृत्तिकारादयोप्यत्र सूत्रे अत्र वृश्रलोपानामेव लोलुवादिन्युदाहरन्
भिदिमृजोस्तु यदि यङ्लुकं तर्हि तस्याने मित्तिकत्वाद्गुणवृद्धिः स्तएव॥ वेभेदिता मरीमार्जितेति यया
पदि तु परस्य हलः स्थ्यत्वापवर्त्तेलोप तर्हि स्थानिवद्भावादेव गुणाद्यप्रसंगः तुमय यथापि नेतन्मूलो दह
णमित्यवधेयं॥ ॥ भाष्यकारास्तु यस्येति लोपस्य अविलुक्वाप्येरथ यगलोपमाश्रित्यैतत्सूत्रं प्रत्याच
ख्यौ॥ नचैवेन नाम्नाद्गिन्यायेन अचि यङ्गोलुगतो लोपं बाधेतेति वाच्यं॥ यस्य हलः इत्यत्र यस्येति योग
विभागेनातो लोप इति वाच्य वर्ति यस्य शस्तातो लोपविधाने नलुग्बाधनात्॥ अदशिशष्टव्यं जनमात्रलु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोवकाशः॥ ततश्चाल्लोपस्य स्थानिवत्वादेव वेमिदिताम् अरीमजितापापवकरस्मादिवल्लोलुवादयो
पिसिध्यंतीति किं सूत्रेण॥ नैवं नोनावेत्यादावपि ह यण ह्लोपापत्तेः। वकारानुकृष्टवकृत्य ग्रहणा
त्तो यमानस्यानेमित्तिकस्य लुकोप्यंतरंगत्वाल्लकारोन्यत्तेः प्रागेव समुदाये प्रवृत्तेः॥ नन्वेवं वेक्रियेलो
लुवः लोष्टवरस्यादावल्लोपस्य स्थानिवत्वाद्यथा गुणो न एवमिपद्वः वज्ञावरिपिन स्यादिति चेत् अत्र
माश्रित्य न भवत एव अक्वथुक्तेः॥ किंतु स्थानिवद्भावबलाद्यकारमाश्रित्य यविध्यतः सा हि यकारे लुप्ते
प्रत्ययसंज्ञकः॥ ॥ स्यादेतत्॥ लोलुगादिष्वकारे लुप्ते पल्लुगितिक्रमः॥ तत्र यकारावस्थानकालेऽप्र
कारेण प्रत्ययत्वं न लब्धमेव लुप्तेपि तस्मिन्नकारेनाल्वेव॥ ततः प्रागेव लोपात्॥ लोपमसत्कथं प्रत
यतां लपेत॥ तल्लोपस्य स्थानिवद्भावेन प्रत्ययत्वामिति चेन्न॥ स्थानिनिर्दिष्टाह कार्यं न द्वितीयेन
लप्यते न तु तत्राल्हमपि॥ अत्राहुः॥ तत्रस्थानिवत्मात्रमतिदिश्यते यदि हि लोपस्य स्थानिभूतोऽप्रका
रहहलुप्तेपि यकारे तिष्ठेत्तर्हि प्रत्ययतां लपेत उवङादिकं च प्रवर्त्तेय दि तिकथं नातिदेशः॥ वो निषेध

नोट्
सत्यसू ४

गणः
८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चेहलिंगं॥ सहि यातेर्यङंताट्टरचि अल्लोपयलोपयोः कृतयोः स्थानिवद्भावेनातो लोपइटि चेत्यालो
पो मा भूदित्येतदर्थं क्रियते॥ स्थानिनिदृष्टस्यैवातिदेशो नु किं तेन॥ न हि यायाय इत्यस्यापवस्थायां आ
तो लोपस्य प्राप्तिः॥ अनजादित्वादिति दिक्॥ ॥नन्वेवं चेक्षियस्तोष्ठव इत्यत्रान्तरंगानपीति न्यायेन
अकृत एवाकृतत्वाभावे धातुकर्योरिति दीर्घयङो लुक्॥ नतोल्लोपस्य स्थानिवद्भावे सत्यापत्ते[illegible]वं अ अ
तोष्ठ अ अ इति स्थान्यकारेण सह हल्घूपधमंगमप्रत्ययपरं जातमिति लघूपधगुणः स्यादेव॥ सत्यं श्रू
तं गणविषयङ्वङ्गोऽभविष्यतः॥ यथाहवाभिककारः॥ शब्दइं तस्यांतरंगत्वेनाल्वादिति तथा च॥ पि
पिगतो॥ धिधारणोइत्यस्यांतु दादित्वाच्छे कृतेरियति पियति धियती ति भवति॥ आशाश्रियतस्मादङ्
वस्यामनुबदित्विनामशीतिवदङ्इयङुवङोऽभवतः॥ तस्मात्स्वयङोल्लोपेनैव सकलनिर्वाहात्र धातु
लोपइतिसूत्रं नारंभणीयं॥ ॥नचैवं मरीमृजत इत्यत्र मृजेर्वृद्धौ सैसंक्रम इति पाक्षिकवृद्धिप्रसंगः हरइत्ता
दिमतेपुग्योनालाघवेनतत्प्रवृत्तेः॥ निक्षेपंतुयथात्तंमुनित्रयमतानुसारिणां व्यवस्थितविभाषा

क्षि ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प॰चा॰घ॰सू॰५)

वास्त्व॥ ॥ अत्र वदंति॥ ॥ गुणोपधालोपयुगपत्प्रसंगे लोपाल्लोपयो रीपत्प्रसंगात्पूर्वगल्लोपोलुकिवत्कुंन
शक्यते॥ तथाहि॥ सर्वत्रदीर्घानिवृत्तस्यानेकुंवर्ण्यत्र्वस्त्रीकृतयोर्लघूपधलक्षणोगुणःप्राप्नोति नत्वेह
स्थानिवद्भावः॥ आदिष्टात्वः पूर्वत्वात्॥ किंच तंगमइत्यत्रगमहनेत्युपधालोपः स्यात्॥ अथार्द्धन
ङीतिप्रतिषेधस्तर्हि हृदीदृशइत्यत्रअहृशोङीतिगुणःस्यात्॥ अपिच॥ देघइत्यत्रदीङ्गुङ्क्षीतियुट्
स्यात्॥ किंवसनीमसोटनीधंसः॥ आनिदितामित्युपधालोपंस्यात्॥ अपिच॥ यायाः वावाः इत्यादि (ल॰नो॰प॰इत्यर्थः ५)
ष्वाकारलोपः स्यात्॥ तस्मात्सपुरायलुगेवयुक्तोलोलुवादिसिद्धये चस्त्रमांभगीयमिति॥ ॥
अत्रोच्यते॥ ॥ लोलुवादिषुगुणस्तावन्नभवति स्थानिद्वारकस्य अनादिष्टात्वः पूर्वत्वं नस्यसत्वेनस्था
निवद्भावात्॥ अतएवहिनयलंतेतिसूत्रेसवर्णग्रहणंकृतं॥ शिशद्धिन्यादौ अनुस्वारस्यस्थानिद्वा
रकमनादिष्टात्वः पूर्वत्वमाश्रित्यतस्यसवर्णाकर्तव्ये अकोरल्लोपस्यस्थानिवद्भावोमाभूदिति॥ न
त्वनादिष्टादचःपूर्वत्वेस्यशास्त्रीयकार्यस्याभावात्कथमतिदेशइतिचेन्न॥ अनादिष्टादचःपूर्वत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रु

परे ऽनुवृत्तः परस्मिन्नित्यतिदेशोऽकर्त्तव्यः स्थानिवदादेशस्त्वस्य प्रवृत्तिसंभवात्॥ सवर्णग्रहणाद्व्याख्याव
सरोस वैरित्यपेवोपपादितं त्वात्॥ ननु कोऽयमादेश उवङ् सोऽनादिष्टस्वः पूर्वत्वात्स्थानिद्वारकार्यविध्यप
तोन तु तस्येह किं विकार्यविधीयते॥ येनाद्योपः स्थानिवत्तस्यैव तस्य च कार्यं विधीयते उकारस्यना
९४ सावर्ण्यः॥ येन स्थानिद्वारापि पूर्वत्वात्प्रयोजनम्॥ सर्वे सर्वपदादेशास्त्वाश्रयणात्स्थान्यादेशभाव
लाव दर्थवतीति भिन्नाम्यति॥ अत एव वक्ष्यासमस्याने स्थानितिपर्यवसितार्थमाश्रित्य स्थानिवत्सूत्रे रोव
सिद्धत्वादेकदेशविकृतस्योपसंख्यानेनाख्यव्याप्तिमिति वक्ष्यते। अत एव स्थानिवदित्युक्तौ संबंधिशब्द
त्वादेवादेशादस्य स्यालापे सिद्धे पुनरादेशग्रहणं आनुमानिकस्याप्यादेशस्य परिग्रहार्थमिति वक्ष्यते
॥ एवं वदहापि लोलूयत्वस्य लोलुवद्रव्यादेशः सनादिष्टस्वः पूर्वः स्थानिवद्भावात्॥ नस्य च लोला
वद्रव्यादेशे कार्ये अश्वोपः स्थानिवादिति युक्तमेव॥ किंच प्रत्याजनोऽजेति तीरूसतरु इति च सूत्रे रीयोंश्च
रणेनश्चं गतेपुनर्भृत्तावविधिनिषेधतस्येति परिभाषा ज्ञापयिष्यते तेन उवङ् कृते गुणो न भविष्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।।दरीदृस्यस्यङ्गुणात्कन भवतीति प्रतिपदोक्तस्याऽग्रहणात्।। अदर्शनमिति यथांपस्लक्ष्यक
ख्रपदेशावेलायां न प्रत्ययः किंतु नदवयवः।। यकारोऽलुमेतुनासोऽङ्क्रारविशिष्टेन वा सृज्यते।। किं
तु तत्र्कैकृणोवात्वात्प्रा सणिकवद्धिलंविनोपस्थितिकः।। नन्वेवमनङ्गीति पर्युदासेप्यस्याग्र
हणाज्ज्ञणमस्य ज्ञालोपस्यादिति चेन्न।। अनङ्गीति पर्युदासेनाङ्सदृशोऽपमाणाज्ञाद्दे उपधालोप
विधानात्।। अर्थवानेवाङ्गुणाद्धिषोगृह्यत इति तु न सम्यक्।। विकरणानामनर्थकत्वात्।। यतुदे
घ इत्यत्र युट् स्यादिति।। तन्न।। अनुबंधनिर्देशात्तनूक्तं।। तिपा शपानुबंधेन निर्दिष्टं यद्गणेन च।। यत्रै
उ४ कान्तग्रहणं वै वपवेतानिनयद्ङ्किति।। तीङोयुङ्खीतिस्त्वेतदोङुत्यनुबंधनिर्देशो यङ्लुङ्वृत्यर्थ इति ल (हरदत्तेनेषु)
पैवोक्तत्वाच्च।। अत्र वक्तव्यं एकाचउपदेशात्तस्त्वेयङ्लुङ्वृत्तिमुद्दिश्य क्रियमाणाको ह्रंहणं।। नाहि सूत्र
कृते पितस्मिन्नृकपरिभाषां विनावेभेदितेत्यादिसिध्यति विभिन्ननीत्यादिसिद्ध्यर्थं चावश्यापी।। अय राम
णोनोपदेशग्रहणस्य उभयविशेषणतायाः सिद्धांतयिष्यमाणत्वात्।। नेवमपिश्तिपाशपेत्याद्यंशांत ८७

मे३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रिकथं ज्ञापकमिति वाच्यं॥ एकदेशानुमतिद्वारा पूर्वाचार्यपठितपरिभाषाज्ञापनस्य गतिकारकोपप
दानामित्यादौ बहुशो दृष्टत्वात्॥ नैवमेकाच इति विधीयमानं हि त्वमपि यद्बहु. किं न स्यादिति वाच्यं गु
णो यङ्लुकोरिति ज्ञापकेन तत्प्रवृत्तेः॥ यङ्लुकि वेभिदितेत्यादौ इग्लक्षणगुणनिषेधपरिभाषैव शरणं॥ द्विःप्रयो
गो द्विर्वचनं षाष्ठमिति वक्ष्यमाणतया धातोस्तन्न[illegible] सावकाशकत्वात्॥ वेभिदितेति यङ्लुके तेन गुणयोगस्योप
मुपगमान्नस्य च स्थानिवद्भावात्रेणिनिषेधः॥ पूर्वस्मादपि विधौ स्थानिवद्भावस्य वक्ष्यमाणत्वात्॥ किंच॥
यस्येतिलोपस्य न याण्वचवलोपत्वं स्वीकृतं तत्र यद्यपि देघकरस्तत्र गुरुस्यादिति नापादनार्हं हलःपरत्वा
भावेनेह यलोपाप्रसक्त्यादेरीयक इति रूपाभ्युपगमात्॥ सनीवन्तर्धकस्यादौ न लोपोपि सर्वसम्मतत्वादेव न
पाद्यः याया यको वा वायक इत्यादावाद्योपोण्णनापाद्यः॥ यलोपविरहेणाणनादिकिंलार्धधातुकपरत्वाभा
वात्तेन यापि[illegible]गमेर्यङ्ता स्खुलिनं गमकरनत्राद्योपस्य स्थानिवद्भावाद्दृष्यभावरत्वोपधालोपः स्यात्॥ अ
थाज्ञानाद्रि. तिप्रतिषेधत्वाहिं दरीदृशाकरत्वत्रसंदृशाद्रि. तिगुणः स्यात्॥ अथ पदीहागमस्तत्परिभाषयासं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यापूर्वको विधिरनित्य इति वा समाधेयम्॥ तेन हि ग्रहणु वापि सनी संसदन्यत्र न लोपो याया वा इत्या ह्लोप स्मनंश
कः॥ समाधानस्य तुल्यत्वादिति दिक्॥ ॥ क्ङिति च॥ ॥ इक इति षष्ठ्यन्तमुपस्थाय विहिते गुणवृद्धी गित्किन्ङि-
ति च निमित्ते न याश्चित्यपेगाकृतस्तेन स्तः॥ गित्॥ जिष्णुः॥ ग्लाजिस्थश्च ग्स्नुः॥ न चायं किदेवास्त्विति वाच्यं
स्थाष्णुरित्यत्र गुणाभावस्थैत्यैव प्रसंगात्॥ नैवं भूष्णुरित्यत्र इट्प्रसंगः॥ श्र्युकः कितीत्यत्रापि चर्त्वेन गकार
प्रश्लेषमाश्रित्य तन्निषेधात्॥ नैवं चर्त्वस्यासिद्धतया विसर्जनीयो न स्याद्वोरुत्वं च प्रवर्त्तेतेति वाच्यं॥ न पुन
रत्र नेति योगविभागात्॥ सोत्रत्वाद्वा॥ तथा च ग्लाजिस्थेति सूत्रे श्लोकवार्तिकं॥ गस्थाग्स्नोर्गित्वान्न स्थ ईकारः
कङितोरीत्वशासनात्॥ गुणाभावस्त्रिषु स्मार्यः श्र्युकोनिट्त्वं गकोरितोरिति॥ तथा दिस्यो ये वं वामन स्त्
लोति स्थश्चेत्यत्र स्थाया श्चात्र्यूत्वाकारं प्रश्लिष्य कसुप्रत्यये तस्यानिष्ठते गकार एव न तु ईत्वमिति व्याख्याना
देवस्यास्नोः सिद्धो न क्वापि गकारप्रश्लेषः कार्य इत्याह॥ नन्वेतं आतेरशो क्ष्वेद स्नुपसंख्यानमिति क्ष्मसे
दस्ताव: पश्चात्स्नवत्ता निदितामिति न लोपः स्यात्॥ सत्यं॥ छान्दसत्वान्न पाद्येय॥ कित्॥ चितं स्तुतं॥ ८९

कि॰२

प्रवृत्तिं तं चिन्तुतः स्तनुतः प्रध्यातो निमित्तसप्तम्या अपवर्गं किं ॥ व्यवहितेपि यथा स्यात् ॥ छिन्नं नपि न्नं ॥ इक
इति किं ॥ कामयते ॥ शरव्यापारा अपवर्गेऽलिंगवायनः अगुणाहि इक एव प्रवर्तते न तु तेन एकपदेपो स्यादि
:॥ अग्रेरिति निर्दिष्टस्यानिकत्वात् ॥ तत्रुक्तं ॥ नच्छित का ग्यो ॥ कप्रकरणादिति ॥ ननु क्ङिति तिसप्तमीनि
र्देशात्तस्माद्विति निर्दिष्टपूर्वस्येति परिभाषोपतिष्ठेत तत्र निःशरदस्मानेतेनैर्यपरत्वादेशोऽर्द्धवारणाक्किय
त्वाद्व्यवहितेर्वृत्तिस्तस्य निषेधः स्यान्न तु छिन्नमित्यादेरपीति चेत् ॥ प्रवेदेवं यदि क्ङिति लुप्ते तत्सन्निषेध्या
क्रियया सामान्यसंबध्येत ॥ इह तु गुणवृद्धिभ्यां संबध्यते ॥ यस्य च भावेनेति सप्तमी ॥ क्रियान्तराश्रवणा
दौत्सर्गिकसत्ताक्षेपः ॥ ततश्च क्ङिति सति प्राप्ते ये गुणवृद्धी इति संबंधे कृते सिद्धसाध्यसमभिव्याहा
रन्यायेन उपलक्षणीभूतसत्ता अपस्थानिमित्तत्वमुत्सर्गतः फलति ॥ नच्छिहाविशेषणानि पि चत्तायां स
प्तमीविधानप्यत्तेनत्र निर्दिष्टपरिभाषा संभवति ॥ विध्यंगभूतानां परिभाषाणां सान्नाद्विधेयनिषे
ध्यक्रियान्वयिन्येव प्रवृत्तेः इदं तु क्रियान्वयिनो विशेषणं न तु क्रियायाः ॥ अतोऽत्र न परिभाषाप्रवृत्तिः ॥ अ

सिद्धसाध्यसमभिव्याहारे सिद्धं साध्याय उपयुज्यते । मलिनं तेय पुःस्ता याः

सुबन्तरलं ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा वृद्धिर्यस्याचामादिरित्यत्र इक्परिभाषोपस्थाने शालीया इत्यादिर्न सिध्येत् तेन ष्ठत्रे कः स्थाने वृद्धि
रत एवादीचामातः स्थाने इति सूत्रे स्थानग्रहणं कृतं आतः स्थाने यो अकार इति अन्यथा नस्यादि
शेषणे आत इत्यस्मिन् षष्ठी स्थाने योगेति परिभाषया अप्रवृत्तेः गुणानां च परार्थत्वादसंबंधः सम
त्वात्स्यादिति न्यायो अत्रानुसंधेयः ननु तर्हि नेनैव न्यायेन क्ङिती इति तत्प्रधानभूतया क्रियया संबध्यतां न
तु तद्विशेषणतया गुणवृद्धिभ्यां ॥ प्रधानान्वयस्य संभवत्त्वात् गौणायोगादिति चेन्न यत्र हि गुणाः कृतात्म
संस्काराः प्रधानोपकाराय समर्हन्ते प्रभवन्ति तत्रात्मनोपि संस्कारमनुभूय प्रधानेन संबध्यते ॥ यथा पाणी
यमेलादिसंस्कृतं पुरुषे गां च गुणाः कृतात्मसंस्काराः प्रधानं प्रतिपद्यते प्रधानस्योपकारे हि तथा प्र
यसी वर्तन्त इति ॥ इह गुणवृद्ध्योः क्ङिद्ग्रहणेन विशेषितयोः प्रधानस्य महानुपकारो भवति व्यवहित
स्यापि प्रतिषेधसिद्धेः क्ङोः किंकरणं वा ज्ञापकं अन्यथा प्रधानेनैवान्वये निर्दिष्टपरिभाषयाऽव्यवहि
ते सत्यां व्यवहिते निषेधस्याप्रवृत्तौ व्यर्थमेव क्ङोः किंत्वे स्यात्तस्य यथाख्यानमेव साधु ननु यदीयं न

नं२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परस्य समीति हि सिद्धे वचनं तेदोषः लघूपधलक्षणगुणप्राप्तेरिति चेदन्यं अन्तरंगत्वादिपट्टवट्टप्रभृतीं षिधा
रणोरियणमेतोनुदात्तः । धियति: । पियति । पियति । लिम्पिडुकृष्णः कर्त्तरि चङ् । अशिश्रियत अडुडुव
त ॥ अस्तुस्तुवत् । इहनिपमाश्रित्यप्राप्तो गुणो न हिंगः प्रबलअन्यापि यङ्कुवङ्वन्तरंगो न तद्के गा
वङ् । नस्यान्तरंगत्वे त्वाणान्तात्वादिति पजेरजादेसंक्रमे वृद्धिर्वधात्वे ति काशिकायां दर्शवरका गुणवृ
द्धीरिति स्वैत्वसंगृहे याकरणांतरे मतत्वे नोक्तं भाष्ये अस्यार्थः संक्रामतोपक्रामतो गुणवृद्धी अस्मा
चं३ दिति सुत्यन्या गुणवृद्धिप्रतिषेधनिमित्तभूतः क्वित्प्रत्ययो ऽत्र संक्रमशब्दे नोच्यते योगरूढः तेनम नं४
सृजिइत्यत्रधातुं शालोपनिमित्तेनया वृद्धिप्रतिषेधहेतावप्यसत्ययेनो विकल्पः प्रवर्त्तते इत्य
वधेयं अतएव क्वित्यचि वेति वचनं तत्र भाष्ये कृतं ॥ मृजेरिति मार्ज्जति । अत्रहरदत्तः अविक्सप्रमाने
पियस्मिन विधि लक्षणंतल्लहणा इति सिद्धे आदिग्रहणा मृज्याज्ञादिपरिग्रहार्थं तेन अपदेशिवत्स्ना
वेनाज्ञानोपधस्यमृजत्वपामम मृजेरत्यादेनभवतीति ॥ नचिंत्यं ॥ मुख्याज्ञादिपरिग्रहेप्रमाणाभा

दा२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वार्त्तं नहि भाष्ये अजादिग्रहणं कृतं येन त्वदुक्तार्थो लभ्येत किंतु क्ङित्यचि वेति वचनं पठितं ॥ यत्तु ततः
प्रागुक्तं भाष्ये इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभंते इति तत्तु नदादिपरिभाषा
बललब्धवाक्यार्थानुवादमात्रं न तु परकीयविधिवाक्यशरीरमिदं येन तदुक्तमर्थं ज्ञापयेत् ॥ अत ए
वात्रेयो मृजेति मित्रादिपाठात् अ[illegible]गणपाठे दृष्टप्रभाव इत्याह ॥ अत एव रक्षितेनापि धातुप्र
दीपे तु दर्पामृजस्फुटदर्पामार्जैरित्युभयं दर्शितं तु धे त्वेनो नुतुं दर्पामृजंत्यत्र व्यवस्थितविभाष
या वृद्धिर्नेष्यते 'अत एव धातुवृत्तिषु पूर्वं ममृज ममार्जेति रूपद्वयमुदाहृतं ॥ यत्तु युक्ताजादिग्रहणा
वादिनोऽपि मते अत्र वृद्धिविकल्पो दुर्वार एव ॥ तथा हि ॥ मध्यमपुरुषबहुवचनस्य थस्य परस्मैपदा
नामिति सूत्रेण विधीयमानो अकारादेशो अलोऽन्त्यस्य प्राप्नोति न चैवं विधिवैयर्थ्यं णलादीनां य
थासंख्यसंपादनेन चरितार्थत्वादित्याशंक्य भाष्य एव द्वेधा समाधास्यति अकारद्वयात्मको यमने
काल्त्वात्सर्वादेशः यद्वा थानोऽन्त्यविकारादादेः परस्येति थकारमात्रस्याकार इति ॥ तत्र पक्षद्वयेऽपि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतोगुणादिति पररूपस्याचः परस्मिन्निति स्थानिवद्भावान्नुमुत्पत्त्याज्जादिन्व प्रप्यत्येवेति कैश्चि
द्धारतत्तमित्र्मते दूषणमुक्तं तेन अघं नवरित्याति देशरवस्थानिवद्भावेपि मुखेन्नाभावस्य सुवचत्वा
दिति दिक्। स्यादेतत्। अचिनोदमार्ट्दस्यादौ स्थानिवद्भावेन तिपोऽङित्वाक्ङितोऽग्रणवृद्धिनिषेधः स्या
त्॥ तन्नाल्लिविधित्वात्स्थानिवद्भावासंभवः॥ अनुबंधकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः॥ अ चेति २
मया अचिनवं अमार्जमित्यादावपित्त्वेन सार्वधातुकमपिदिति ङित्वापत्तेः इहत्वज्ञापकं न स्यपीति
सूत्रं अन्यथाल्यपः कित्वाभावादेवर्द्धत्वाप्राप्तौ किं तन्निषेधार्थेन सूत्रेण॥ यत्तु सेद्योपिद्वेति अपि
द्वचनं ज्ञापकमिति॥ तन्न॥ अपीहि विभ्रूतः पनीत्यादौ स्थानेनैतेन तमपीभावयापित्वाद्गुणान्तस्य
सिपं स्थाने तु दान्तसोवहेः प्राप्तौ ऽदान्तसपादनेन चरितार्थत्वात्॥ ॥ अपित्त्वसामर्थ्याद्धितञ्जं न
तमपरिभाषाबाध्यते॥ प्रतिपत्ति[illegible] साघवार्थं मुलन्तइति वक्तव्ये अपिद्वचनं ज्ञापकमिति वा
॥ न्यायसिद्धोप्ययमर्थः॥ अनुबंधानापन्नेकान्तत्वेन स्थानिको टवमाविहृतपास्थान्यलाश्रयावि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङिद्विषयकस्यानल्विधाविति निषेधस्याप्रवृत्तेः॥ अर्थवत्त्वाधारकौ नाड् इति मतेपि स्थानित्वप्रतीतेः आगे
वांतरंगेणायो वेनतेषामपहारात॥ तस्माद्यथादेशानां तिबादीनां स्थानिवद्भावेन ङित्वं दुर्वारमिति
श्रश्वाङः पाष्टपरस्मैपदेष्विति सूत्रे ङिद्वचनं ज्ञापकं लादेशानां स्थानिवद्भावेन ङित्वेन भवतीति
॥ तथा च वार्तिकं॥ लकारस्य ङित्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्ध
मिति॥ ननु स्तुयादित्यादौ अनिग्लक्षणावृद्धिप्रतिषेधार्थं चिनुयुरित्यादौ नुसिचेन्यस्य प्रतिषेधा
र्थं वा यासुटो ङित्वमस्तु॥ उतो वृद्धिर्लुकि हलिन्म ञ्राहि उत इति निर्दिष्टस्यानिकत्वयाद्कूपरिभाषा
नोपतिष्ठते॥ तुसिचेतितु ङितीति चेन्नस्यापवाद एव॥ तथा च स्थानिवद्भावलब्धं ङित्वं स्तुयाच्चिनुया
दित्यत्र वृद्धिगुणौ निषेद्धुं नालं॥ पुनर्ङित्वसामर्थ्यात्तु न तदुभयनिषेधो ऽपि विध्यातितयावद्वृद्धिगुणाति
षेधे वाताऽर्थं यासुटो ङित्वं कथं लादेशेषु लाश्रयङित्वस्य समविहितं ज्ञापयेदिति चेत उच्यते उतश्रौ राम
सिनवन्नेचा वृद्धिग्रहणां संज्ञापूर्वको विधिरनित्यो यथा स्यादित्येवमर्थं॥ तेन स्तुयादित्यत्र न वृद्धिः ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥तथा चिनुयुरित्यत्र न गुणः॥ स्कम्पाचीत्यतो चीत्यनुवर्त्य अजादौ जुसि गुणविधानात ॥मिदेर्गुणो
जुस्चेत्यकारं प्रश्लिष्य अश्चासावुसश्चेति कर्मधारयो अपतो न अजादौ उसि गुणविधाना अपरो नु
वक्रुर्जेकुरित्यादावतिप्रसंगः॥ गुणोत्तिलुप्तविभक्तिकं उजुसिति च्छेदः॥ उकारादौ जुसीति वार्थः॥
॥जुसि गुणो यासुट्प्रतिषेधस्य निवार्त्तिकमपि उङ्कर्तित्यादि सिद्धार्थकथनपरंमिति नावद्धानिक ककार
स्पष्टयं॥ ॥भाष्यकारमतेनु सार्वधातुकमपिदिति सूत्रे अपिदादिति योगं विभज्याऽऽदिति वानुवर्त्य
स्याहृतिं वाश्चित्याऽऽश्चपित्र भवति पिच्चाऽऽन्न भवतीति वाक्यार्थद्वयं वर्ण्यते॥ इंधिभवतिभ्यः इति सूत्रे
भाष्ये स्पष्टं तेन कृतादित्यत्र गुणवर्द्धेन॥ तान्तरः औपदेशिकः [illegible] त्वेनांतरंगत्वात् आतिदेशिकस्य
वहिरंगस्यापित्त्वस्य बाधात॥ अतिदिष्टादुपदिष्टं वलीय इति न्यायात॥ अपि नो दित्त्वादेतत् औपदेशिके
नतिवादीनां पित्त्वेन ला अपमातिदेशिकः त्वं बाध्यते॥ तेन गुणादिसिद्धिः अस्मिन् पक्षे यासुटोऽ
त्ववचनं न ज्ञापकं किं तु मध्यात्यादावप्राप्तङित्वविधायकं॥ तेन चापित्त्वस्याविनोतीत्यादौ सावका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्यबाधः॥ अतंस्तनुयादित्यादौ पितिहलीति विधीयमानाया वृद्धेर्न प्रवर्त्तते॥ बिभृयुरिति तु प्राग्वदेव समर्थनी
यं॥ पूर्वोदाहृतवार्त्तिकमते तु भूतादित्यत्र इट् प्राप्नोति॥ आगमशास्त्रमनित्यमिति तु कथंचित्समाधेयः॥ व
लुन लु॥ हलः श्नः शानज्झाविति शानचः शित्करणेन क्ङिदनुबंधकार्ये प्यनल्विधाविति निषेधः प्रवर्त्तत इ
ति ज्ञाप्यते॥ तेन ऊतादित्यादौ न कश्चिद्दोष इति अत एव भाष्यमते भविषिष्टेत्यत्र ङित्वं न करिष्यमाणेत्यन्ये॥
णिच्छ्वपाषिच्छ्वसताम्बूर्ङिन्नेतिरिक् दीधीवेवीटां दीधीवेव्योरिटश्च गुणवृद्धी न स्तः॥ आदीध्यनं॥ आदी
ध्यकः॥ आवेव्यनं॥ आवेव्यकः॥ अकणिषं अरणिषं॥ कणिता श्वो रणिता श्वः॥ इह अमंशति क्षिजंतमंगं
तिपोऽदेशं शतितु कणित इति तांतमंगं तत्र अपंज्ञदेशं च सार्वधातुकं निमित्तीकृत्य लघूपधगुणः प्राप्तो
ने न निषिध्यते॥ वृद्धिस्तु इटो न संभवत्येव॥ लुङं ततांश्को ऽपि तुश्च इत्यस्य प्रयोगः॥ न हि तज्जंते तत्र तेवा इत्ले
गुणप्राप्तिः॥ प्रत्ययावयवत्वात्तस्य॥ अप्रदीङः स्ये धीङ् अनादरे॥ वेञ् तंतुसंताने॥ णिगत्यादिषु एतेषामिह
ग्रहणं कुतो नेति चेत्॥ न॥ अवयवप्रसिद्धापेक्षया समुदायप्रसिद्धेर्बलवत्त्वात्॥ किंच॥ वतुर्णां ग्रहणे मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेतेऽसंदेहार्थं दीवेधीवी टांइत्येव वक्ष्यमाणात् ॥ इत्युक्त्वात् अत्र आगमस्यैवग्रहणे तेन तु इट् आगता विति धातुः ॥ ननु धातु
साहचर्याद्धातुरेव गृह्यतां मैवं साहचर्यस्य सर्वत्राऽनियामकत्वात् ॥ अन्यथा द्विः त्रिश्चतुरिति कृत्वोऽर्थे इ
ति सूत्रे कृत्वोऽर्थग्रहणं न कुर्यात् द्विस्त्रिरिति सुजन्ताभ्यां साहचर्याच्चतुरित्यस्यापि सुजन्तस्य ग्रहणसम्भ
वात् ॥ अत एव आगमापेक्षया प्रकृतेरभ्यर्हितत्वात् दीधीङः पूर्वनिपातः सूत्रे कृतः टोपि धातुत्वेन तु प्रकृति ६४
त्वाविशेषादल्पाच्तरत्वात् सेव पूर्वनिपातः स्यात् ॥ अत्रेदमवधेयं ॥ दीध्यकोवेव्यकरदिति पठद्भिर्हरदत्तेन त
दीधीवेवीभ्यां शुद्धाभ्यामेव राद्धुलिङि रूपं न तु णपंताभ्यामपि ॥ यत्तु यीवर्णयोरिति सूत्रे हरदत्तेनोक्तं वर्णग्रा
हे वर्णाविल्लारेरिति धातोः पचाद्यजन्तः रूपमाणए वेवर्णो यथा स्यात् लुसेमाभूदित्येवमर्थः ॥ तेन णपंता
भ्यां राद्धुलिङि णिलोपस्य पूर्वविधौ स्थानिवत्त्वोपि रूपमाणत्वाभावात् लोपाभावे यणि कृते दीध्यकोवे
व्यकरदित्येव शुद्धेन समानाकारं रूपं भवतीति तदेतन्नाऽऽलोपशास्त्रात् इत्यादिना भाष्ये तस्मिन्सूत्रे भाष्यकारैरेव
णपंतस्य दीधकरदिति रूपं शुद्धस्य तु दीध्यकरदिति अनुत्पादितत्वान्निश्चयान् विरोधाद्दुर्वेर्षः ॥ तत्र हि वर्णग्रह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४ ०) प्रेयी वर्णेयथास्यादित्येवमर्थमाशंक्यस्यात्निवद्भावेनसिद्धेरंतरङ्गत्वाससिलोपात्प्राक्यीवर्णयोरितिलोपसिद्धेश्च वर्णग्रहणं॥१

णं प्रत्याख्यातं ननु वर्णग्रहणं कुर्वतः सूत्रकारस्याशयं भाष्यकारोक्तादन्यमेवानुसृत्य कैयट इति चेत
॥ सत्यं तथापि पयोनंत्रं मुनीनां प्रामाण्यापत्या शुद्धिस्तदवस्थैवेति दिक् स्थानिवत् दीधीवेव्योः ङित्वा
द्विकृतिर्निवेतिसूत्रेणैव निषेधोक्तिः॥ किमिह दीधीवेवीग्रहणेन मैवं॥ इग्लक्षणयोर्हि स निषेध इत्युक्तं॥ न
च श्रवोर्मातीति स्थित्सिद्विग्लक्षणा॥ किंच॥ कार्यिणो निमित्तत्वे पूर्वेणासिद्धिः संभवेदपि॥ नच कार्यिनि
मित्ततयाश्रीयते॥ व्यवतेस्त्रवतेरित्यादावपि गुणनिषेधापत्तेः॥ अव्यलिंगं कुटादिमध्ये कुङ् शब्दे इत्यस्य
सपाठः स्थानेस्थापयितरितिनिर्देशश्च॥ यत्तु प्रकृतसूत्रे दीधीवेव्योर्ग्रहणमेवैतत्परिभाषाज्ञापक
मिति तन्न अन्निग्लक्षणाद्वृद्धिनिषेधेन चरितार्थत्वात् भाष्यमते एतत्सूत्रस्य प्रत्याख्यातस्यापानन्तपाउ
क्तपरिभाषापांलिंगांनरस्यैवानुसर्तव्यत्वाच्च॥ स्थानिवत्॥ यदि कार्यिनिमित्तकत्वेन नाश्रीयते कथं त
र्हि ऊर्णुनविषतीत्यत्र द्विर्वचनेति नुशब्दस्य द्वित्वं॥ रषयन्ययस्य अजादित्वेपि द्वित्वं प्रति कार्यिमध्ये प्र राम
विष्टतयानिमित्तत्वासंभवात् सन्यङोरिति षष्ठीपाश्चत्यमतेन स्याद्वित्वविधानात् अन्यथाप्रतीषि ९३

नेर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षतीति सन्नोद्वित्वं न स्यात्॥ यत्तु सन्यङोरिति सप्तम्या अयमपि सन्यङोरकारोच्चारणसामर्थ्यात् द्वि
त्वं भविष्यतीति॥ तत्र॥ दित्सप्सिसादिभ्यो बहुत्वान्न प्रतिबंधेन अबो पादितियत्स्वयोत्पादने नत्वाका
रोच्चारणस्य चारितार्थत्वात् अन्यथा अरिरिषतीत्यादौ सिद्धेः स्वा॥ यदि हि तत्रापि स्थानिवत्स्यात्तदासो
द्विर्वचने कृते अरीषतीति स्यात्॥ अत्रोच्यते॥ कार्यमनुभवन्नेव कार्यिनिमित्ततया नाश्रीयत इति प
रिभाषार्थः॥ अरिरिषतीत्यत्र हि अजादेर्द्वितीयस्येति रिस् शब्दे द्वित्वप्रवृत्तिः तदंतर्गत अरिस्शब्द
तिनासोद्वित्वप्रतिनिमित्तं कार्यभाक्त्वात् ऊर्णुनविषतीत्यत्रतुनवशब्दस्य द्वित्वप्राप्तं तदन्तर्गत
अरसशब्द इति भवत्येव निमित्तं न त्वावभावितामात्रेणोहनिमित्ततेति सन्यङोरिति सूत्रे भाष्यका
रैरेव स्फुटीकृतत्वात् तत् यावद्द्विर्वचनेचीति स्थानिवद्भावानुशासस्य द्वित्व सूचितमेव॥ यत्तु द्विर्वच
नेचीति सूत्रे अविविकिंजे छ्रीयते देध्यीयते रनिर्दिश्य चाप्रत्नुदाहरणं तदापानतः॥ छीयध्यीप्रत्यमस्य द्वित्व
भाक्कपाई ग्राधयोरितित्वं प्रतिनिमित्तम तस्य यङो द्वित्वं प्रत्यनिमित्तत्वात्॥ तस्मात्तत्र अचीत्यस्य अपि

३९

शा.कौ.
९८

ङ्ग इत्येतदेव व्याख्यातं तत्त्वबोधिन्यां गाङ्कुटादिति द्विलकारकनिर्देशमाश्रित्य लावस्थायामेव गाङादेशविधानात्
॥ अनुग्रहणं तु ज्ञापकं रूपस्यानिवृत्त्यावस्थेति तत्रत्यं वार्त्तिकमपि अधिगत्य गाङ् इत्येतस्मिन्नुदाहरणे कार्यं
ति देशात् अयतोऽनुग्रहणं वैयर्थ्यं स्यादित्येव योऽन्यमिति दिक्॥ ॥ यत्तु असिद्धवत्सूत्रे व्यस्तेऽत्र ग्रहणं
समानाश्रयत्वप्रतिपत्त्यर्थमिति तत्र आश्रयत्वं स्थानितया निमित्ततया वा कथंचिदाश्रयणमात्रेण न तु नि
मित्ततयैवेत्याग्रहः॥ तेन शाहावितिशाभावो हेर्धित्वे कर्त्तव्ये असिद्धो भवति अन्यथा धित्वे हेः कार्यितया नि
मित्तत्वाभावादसिद्धत्वं न स्यात्॥ अत एव समानाश्रयमाभीमाभीये असिद्धमित्येकाङ्गेन तु समाननिमित्त ४५
मिति॥ ॥ इत्येव सूत्रे भाष्यवार्त्तिकयोः प्रत्याख्यानं॥ तथा हि॥ दीधीवेव्योश्छान्दसौ धातू॥ न तु लोके प्रयोगा
र्हौ। छन्दसि त्वनयोर्गुणो दृश्यते॥ होत्रापश्यतः रूपयन्त्र दीधेत॥ अदीधयुर्दाशराज्ञे वृतासः इत्यादौ त्वायं वा
हुलकेन समाधेयः॥ तथा सति निषेधसूत्रानारम्भस्यैव लाघवेनोचितत्वात्॥ तथा इटोऽपि ग्रहणं व्यर्थं॥ आ
र्धधातुकस्येडित्यत्र हि नेड्वशि कृतीति सूत्रादिड्ग्रहणमनुवर्त्तते॥ तच्च इटो विकाराभावार्थं इट् इडेव न तु विकृत राम ९८

श्री

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति व्याख्यानात्॥ ततो लघुपधगुणाभावात् सिद्धं कथितानां भ्वोरणानां भ्व इत्यादिं न चैवं पिपठीरित्यत्र दी
र्घो न स्यादिति वाच्यं॥ तस्य नियमं प्रत्यसिद्धत्वात्॥ अपाठीदित्यत्र सवर्णदीर्घत्वं न वार्यते। सिज्लोप एका
देशे सिद्धो वक्तव्य इति ज्ञापकात्॥ यद्वा॥ अंगाधिकारे क्रियमाणो नियम अंगमेव विकारं व्यावर्त्तयति॥ ते
न वोर्णानि अकः सवर्णे इति दीर्घो भवत्येव॥ गृहीतेत्यत्र तु ग्रहोलिटीत्यारंभसामर्थ्याद्दीर्घो भवत्येव॥ इत्व
गृथिष्यते॥ पिपठिषिवान् लक्षणाकुलानीत्यत्र सांतमहतः संयोगस्येति दीर्घत्वं न स्यात्॥ सिद्धत्वादागत्वाने
जांसीत्यादौ चरितार्थत्वाच्च पिपठीरपाठीत् ग्रहीतेत्यादि पूर्वोदाहृतेष्वोसयैव लक्षणादिति॥ अत्राहुः॥ पिपठि
षीति प्रयोगे असाधुरेवं न ह्यत्र उमागमो लभ्यते अल्लोपस्य स्थानिवद्भावेनाकृतत्वात्॥ नचैवमजंतत्व
प्रयुक्तो नुम् स्यादेवेति वाच्यं॥ तस्य सकारादुत्तरत्र प्रसक्त्या दीर्घस्य तथाप्यप्रवृत्तेः॥ सांतसंयोगाभावात्॥ वल्क
तल्क अजंतत्वप्रयुक्तो नुमत्र न भवत्येव॥ स्थानिवद्भावासंभवात्॥ अनादिष्टाच्चः पूर्वस्य विधौ हि सः॥ नवाजे
तमनादिष्टाच्चः पूर्वं येन तस्य नुमि कर्तव्ये अल्लोपः स्थानिवत्स्यात्॥ नेदं ल्वेतत्वप्रयुक्तो नुम् दुर्वारः॥ नचत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

४०

सा॰कौ॰
९५

क्विपि सखीः सुतीयतेः सुती १

स्मिन्नकृते य्वोः स्थानिवद्भावः शंक्यः ॥ क्वौ लुप्तं न स्थानिवदिति निषेधात् । अन्यथा सखीयतेः रित्यादि न स्या
त ॥ अस्त्रेष्योपस्य स्थानिवद्भावेन यणादेशप्रसंगात् ॥ अत्रोच्यते ॥ क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसं
ख्यानमिति तावद्वार्त्तिकस्य शरीरं तत्र क्विग्रहणं शोपधपि द्वेधा व्याख्यास्यते ॥ क्वौ लुप्तं न स्थानिवदिति ॥ क्वौ
विधिं प्रति न स्थानिवदिति वा देवयतेः क्विपि द्यू[illegible]रित्यादेरन्तरव्याख्यानाश्रयणे न सिद्धावपि सखी
यतेः सखी रित्यस्याद्यव्याख्यानं विना असिद्धेः ॥ लवमाचक्षाणो लौ रित्यस्य द्वितीयव्याख्यानं विना क्षा५
असिद्धेश्च । तथापि क्वौ विधिं प्रतीति द्वितीयव्याख्यानमेव सार्वत्रिकं ॥ क्वौ लुप्तमिति तु क्वाचित्कं व्या
त्यादित्यत्रमपर्यंतस्येत्यत्र च भाष्यादौ आश्रितं न तु सार्वत्रिकं ॥ अत्र च यङ्ग्रहणप्रत्याख्यानपरमत्रत्यं
भाष्यमेव प्रमाणं कथमन्यथा पिपठीषीत्यादौ दीर्घस्य षत्वे रूत्वे रित्यावतत्लोपे इङ्ग्रहणं प्रत्याचक्षीत
॥ तस्मात् पिपठिषिशब्दस्य गाकुलानित्येव रूपं भवतीति स्थितं ॥ ॥ हलोनंतराः संयोगः ॥ ॥ अज्भिरव्यव राम
हिताः हलः संयोगसंज्ञाः स्युः संज्ञाप्रदेशाः संयोगांतस्य लोपः स्कोः इत्यादयः ॥ इह अंतरशब्देन छिद्रं वा विनावक्रं ९५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वौ ह्रौ निष्पिण्डि द्वादश्यपर्यन्ता भावदवग्रहे संज्ञयानभावं श्राधेयप्रधानेनान्तरेणापायेन समाहृत्य कुर्विद्वेहो नु श्रा
वैय निषेधप्रतीतेरवग्रहेपि भाव्यमेव संज्ञया॥ न हि न त्रान्तरामध्ये किंचिदस्ति किंतु मध्यमात्रं वर्त्तते
॥ मात्राकृत्वस्तावदवग्रहान्त[illegible]रमिति प्रातिशाख्यवलेन तत्र मात्राकालावसानाभ्युपगमात्॥ च
नु प्रातिशाख्यान्तरं अर्द्धमात्रोवग्रह इति तन्न तु सर्वत्र संहितायां अर्धमात्रकालस्य समत्वात् ततो तिरिक्तो
र्धमात्राकालोवग्रहेस्तीत्येवंपरं त्वन्तः प्रातिशाख्ययोरविरोधः नेदिहकृतनः प्रयोगाद्य इति चेत्॥ उ
भययापप्पदोष इति भाष्यकाराः॥ नन्वप्रसुरस्यादोसत्यां संयोगसंज्ञायां संयोगे गुर्विति गुरुत्वाद्रुते
रन्नत इति स्तुतेन भाव्यं॥ नत्वन्मथ्येति महान्फलेविशेषः॥ नत्कुर्यंपस्तद्दयाभ्युपगम इति चेन्न॥ न॥ आपि
न्यस्याधिकरणाहतेर्दूराकृतसंबंधाभावात्॥ क्रियार्यमाणानाभिन्यादौ तु कौ वा स्पदोरत्यनुवर्त्तनं तु गुरोर ने।३
न त इति॥ नन्वप्रभवो मस्व्यः दिगाद्विपाठघत्स्वपोयोनियन्मनुषुचेति समस्याश्चलुक्॥ ततः संबुद्धे
हे अपसघोत्यत्रस्यादेवफलमेद इति चेन्न॥ स्वचाङ्नेवंधविषये अवग्रहं परकाराः कुर्वन्तीति॥ अत्र वसत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(मा नस्तोक इति मंत्रे मा नो महान्तमिति मंत्रे च रीरिषदस्य स्पष्टस्थाने पदस्य दर्शनमिदम् २)

दाय एव प्रारणमिति वोध्यं ॥ युक्तं चैतत् ॥ गोभ्यो गातुं गोभिर्मदाय ॥ चित्र इद्राजा राजका इदन्यके इत्यादे
गोभ्यो गोभिः राजकाइत्यादीनां सत्यपि पदत्वे अवग्रहाकरणात् ॥ ईयिवांसमति स्त्रिधइत्यादौ ईयिवांस
मिति विनापि पदसंज्ञा क्सोः पूर्वमिडागमान्तेऽवग्रहकरणाद्य एतेनासिमासनं उक्थशसः रिशिदइत्या
दौ पदकाले सत्वङ् स्वत्वाद्योपि व्याख्याताः ॥ पतु मा नो महान्तमिति मंत्रे वेदभाष्यकैरुक्तं यांदसः पद
कालीनो ह्रस्व इति तदपि संप्रदायमात्रपरतया कथंचिन्नेयं नलव्यः रोनपद कारइति भाष्ये पदविभा ६१५
८१६ गः पौरुषेय इति कैयटप्रभृतिभिः ताला दितिरिकं काथं तार्हित्तत्रत्रावग्रहे विशेष इत्युच्यत इति चेत् अ
वांतरपदत्वे सत्यवग्रहः क्रियत इत्युत्सर्गमभिप्रेत्येति गृहाण ॥ अप्सु योनिर्वा अश्व इत्यादावपस्
शब्दस्यान्यत्वेनास्त्यवग्रहः ॥ अवांतरपदसंज्ञानेकत्वे उत्तरकालप्रवृत्तिकयावग्रह इति वैदिकसंप्रदाया
त् अन एवमप्सरोमभिरित्यत्रभिसः पूर्वमवग्रहः नमउक्तिभिरित्यत्राप्येवं इंद्रवणाः पुरएते वेत्यत्रचैव
शाद्यास्ताभिरिति दिक् ॥ ॥ महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं ॥ संयुक्तं तैः स्मिन्समुदायेव राइति ५म

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत् प्रत्येकं ॥ तथा हि सनि निर्याया
दित्यादौ यकारः संयोग इति वाक्यस्य संयोगादेरित्येत्वं स्यात् ॥ सिद्धांते तु ऋचोर्हाभ्यामिति द्वित्वे
सत्यपि तस्यासिद्धत्वान्नियायादित्यादावेत्वेन भवितव्यं ॥ प्रत्येकं संज्ञेति पक्षे संहृषीष्ट इत्यत्र
ऋतश्च संयोगादेरितीट् स्यात् ॥ संक्रियत इत्यत्र गुणोर्त्तिसंयोगाद्योरिति गुणः स्यात् दषत्करोतीत्य
त्र ककारसन्निधौ दकारस्य संयोगत्वात् संयोगांतलोपः स्यात् ॥ शक्कावस्ते इत्यत्र ऽलितकारे पतनः
स्कोरिति लोपः स्यात् ॥ निर्यात इत्यादौ संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं स्यात् ॥ ज्ञातो
वेदं वृक्ष्णवनं हल इति ॥ नात्पाख्यायामेकस्मिन्निति वचनात् ॥ तेन द्वयोरपि संयोगसंज्ञा भवति ॥
९३ ऋतं शितेस्यादौ गुरोश्च हल इत्यप्रत्ययः सिध्यति ॥ यत्र तु बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां चा
विशेषण संज्ञा ॥ न च एकाज्द्विर्वचनन्यायेन समुदायस्यैव स्यादिति वाच्यं ॥ वैषम्यात् ॥ तथा
हि ॥ द्विर्वचनं समुदायावयवैकार्थो युगपत्कर्तुमशक्यं संज्ञा तु शक्या ॥ तथा समुदाये द्विरुक्ते च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वयवा अपि द्विरुक्ता भवंति॥ हलः प्रचलनस्य हावयवैः प्रचलतीति न्यायात्॥ इह तु समुदाये प्रवृ
त्तया संयोगसंज्ञया नावयवानां तत्कार्यसिद्धिः॥ अतो अविशेषेणाद्ययोर्द्वयोर्नाच संज्ञेति स्थितं॥ य
दि तु बहूनामेव स्यात् नहि संस्कर्यत इत्यत्र गुणोर्त्तिति गुणो न स्यात् गोमान्करोतीत्यत्र संयोगांतलो
पो न स्यात्॥ निर्ग्लान इत्यादौ निष्ठानत्वं न स्यादिति दिक्॥ ॥ ननु यदि द्वयोरपि संज्ञा तर्हि इंद्रियते स्म
निंद्रद्रीयिषतीति न स्यात्॥ इह हि संयोगो द्वौ॥ नद्रौ दरौ च॥ तत्र नकारस्यैव दकारस्यापि नन्द्रार
ति द्वित्वनिषेधः प्राप्नोति॥ नैष दोषः॥ तत्र हि अजादेरित्यनुवर्त्तते॥ सा च कर्मधारयात्पंचमी तेन अजा
दे[illegible]र् वः परे नद्राः संयोगादयो न द्विरुच्यंत इति सूत्रार्थः॥ एवं च पूर्वसूत्रे द्वितीयस्येति न कर्त्त
व्यमेवेति वसतो॥ हल किं॥ तितउःप्रां अत्र तनोतेर्डउः सन्वच्चेति डउ प्रत्ययः॥ सन्वद्भावोहि न स ८३
न्यतइतीत्वं च॥ व्यक्तोच्चारणसामर्थ्याद्गुणाभावः॥ यदि हि अचोरपि अनंतरयोः संयोगसंज्ञा स्या
त् तर्हि संयोगांतस्येत्युकारलोपः स्यात॥ अनंतरा इति किं॥ पनसमृयदीहसकारमकारयो संयो राम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गसंज्ञा स्यात् नहि स्कोरिति सूत्रेण सकारलोपः स्यादिति दिक्॥ ॥मुखनासिकावचनोनुनासिकः
॥ ॥मुखसहिता नासिका मुखनासिका तयोच्चार्यमाणोनुनासिकसंज्ञः स्यात्॥ संज्ञाप्रदेशाः॥
आङोनुनासिकश्छन्दसि इत्यादयः॥ अभ्र आँ अपो भ्रणानाग्राभीरआँ उग्रपुत्रे॥ इह ज्यानः इति वच
नः॥ कृत्यल्युटो बहुलमिति बाहुलकात्कर्मणि ल्युट्॥ एवं भोजनाः शालयः इतिवदिति ह्यन्य
नुसारिणः॥ भाष्यके यटयोल्कश्चयतैनेनेति वचनेकरणे ल्युट्॥ सामान्येन पुंसकं॥ शकांच
पंक्तिः ५ स्तुटुपहेतुमितिवत्॥ तेन तुल्यं क्रिया चेद्वतिः॥ संस्कृतं भक्षाः इति वत्॥ इत्थं विशेषणानां चाजाते
रित्यत्र वक्ष्यमाणेन परसंस्कारपक्षे गुणवचनानामित्यादिवार्त्तिकमिच्छनेन सह पयानवि
रुध्यते तेन तथानैव वक्ष्यामः॥ ततो मुखनासिकावचनो यस्येति बहुव्रीहिः॥ मुखेति किं यमानुस्वा
राणामेव मा भूदिति भाष्यं॥ तत्र वर्गेष्वादितश्चतुर्णां पंचमे परे तन्मध्ये पूर्ववर्णसमानाकारः श्रुति वर्णांतरं २
शास्त्रे प्यागमत्वेन विहितं तत्र यमसंज्ञं॥ यमइव यमः॥ यमो हिलोके आयेणसमानाकारो भवतः

(संस्कृतं भक्षा इत्यादिनिर्देशेन गुणवचनानामित्यस्यानित्यत्वं वक्ष्यत इत्यर्थः ३)

४३

शा.कौ. गयथापालिक्नीः। आस्वरश्नतुः अग्निः अग्नीन्। इत्यत्र कखगघ इत्येभ्यः परभागे तत्सदृशो यमागमः
९९ ॥ यन्त्वं कं विवरणे वर्गपंचमयुक्ताः प्रथमादयो यमा इति नचिंत्यं अयोगवाहत्वप्रतिपादकेन हयव
रट्सूत्रस्थभाष्येण सह विरोधात्॥ केवलनासिकत्वपरेण यमानुस्वारयोरिति भाष्येण सह
विरोधाच्च॥ अथेदं भाष्यं न केवलनासिकत्वपरं किंतु ओँ इत्यादीनां भागमात्रं नासिक्यं यमानु
ख५ स्वारयोस्तु मुखनासिकत्वेपि प्रासादवासिन्यायेन नासिकत्वमप्यस्ति न तु नदीयं भागमात्रं न
थेत्येवं परं तथापि अँ इति अनुगतिं दुःसंभव एव॥ किंचैवं नैव सोष्णो नैव प्रयोजनमिति तदुत्तरभा
ष्यग्रन्थविरोधः॥ यत्तु नीत्या दोषपरोऽनुनासिक इत्यत्र स्वप्रकृत्यापत्यालत् पदे दोषप्रसंगात्॥ अ
१३ नएव प्रातिशाख्ये॥ स्पर्शा यमाननुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेष्वित्युपक्रम्य प्रदे
प्र छन्न२ धुव [illegible] श्वाचित्यत्र यमं निषेद्धुमाद्येन स्पर्शस्याघ्रवकृतेः पालाघ्मापतिमिति सूत्रेपालाच्छूदःप्र शाप:
युक्ताः॥ यमः प्रकृत्येव सदृक्कृतिर्वायमेन मुख्यास्ति समानकालेत्यादि सूत्रांतरेष्वपि स्पष्टमेव ९९

यमस्वरांतरत्वां॥ तथा नारदीयशिक्षायामपि॥ अनंत्यश्चभवेत्पूर्वो ह्यंत्यश्चपरतो यदि॥ तत्र
मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोरिति॥ सवर्णाः सदृशाः॥ अत्र पूर्ववर्णयोरिति द्वित्वमविवक्षि
तं यत्र इत्यादौ जकारद्वयसत्वेपिज्ञपा॥ अत्र वसवोरंतरे वा इत्यादौ जकारद्वयाभावेपि तद्व्याख्या पा३
तारः॥ तथा अनंत्यं व्याकरणाख्यसंक्षादौ पलक्षणाप्यप्रतीता श्चोदयञ्जिरप्यस्वयत्न॥ अनं
त्यांत्यसंयोगे मध्ये यमः पूर्वस्यगुणः इति॥ पूर्वस्य गुणइत्यस्य पूर्वमक्ष इत्यर्थः॥ एते नागमत्वं स्पष्
टीकरोति॥ तथा संयोगमध्ये लब्ध्वा पांगीतमथिशिक्षायामपि॥ अथ चतुर वरणामुदाहरणं
सपमा यमा पां सपमा स्तावघयोन्निरिति द्वौ गकारौ यमन कारौ न इति द्वौ जकारौ यमम का य४
रावित्यादि॥ तथा तत्रैवग्रथांभे अयस्मिं द्वौ दारू पिंडरूपौपिंड श्वेति तेषां संयोगं विभज्यय
मसहितमयस्पिंड मित्युक्तं अंतस्थयमसंयोगे विशेषो नोपलभ्यते॥ अथ शरीरमुत्पाद्यं तं
स्यः पिंड नापकरत्युक्तं अंतस्था नवर्ग पंचमः अशरीर मिति स्वरभक्त्या दिव द्विजकलिपिवि

५५

शा.कौ.

९९

शेषस्त्वमिति मर्थः॥ लक्षणावशेनैव तदीयस्थलविशेषनिश्चयसंभवात्किं विसंप्रदायप्रवर्त्तकाचार्यैः
स्वरभक्तेरिव यमस्यापि वंजुकीभूतालिपिर्न कल्पितेत्यर्थः॥ रलयोरूष्मसु परो मध्ये स्वरभक्तिरि
ति हि प्रसिद्धं शिक्षादौ॥ यत्र तु नैवंविधेन लक्षणेन स्थलावधारणं कर्त्तुं शक्यते तत्राचार्यैर्लिप्यन्तरं प्रवर्त्ति
तं यथा विसर्गादौ पाणिनिप्रधितायामपि त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः॥ प्राकृते संस्कृ
ते चापि स्वयं प्रोक्ताः स्वयंभुवा स्वरा विंशतिरेकश्च स्पर्शानां पंचविंशतिः॥ यादयश्च स्मृता ह्यष्टौ चत्वारश्च घ५
५क५पौ५ यमाः स्मृताः॥ अनुस्वारो विसर्गश्च ꣵकꣶपौ चापि पराश्रयौ॥ दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव चेति श्च
त्र हि यमानां पृथग्गणनान्नास्पष्टमेव वर्णानित्वं॥ गणना त्वित्थं॥ अइउऋ इति चतुर्णां ह्रस्वदीर्घप्लुत
भेदात्त्रैविध्याद् द्वादश॥ ऌकार एकः॥ एचां दीर्घप्लुतभेदादष्टौ इत्थं स्वरा एकविंशतिः॥ स्पर्शाः पंचविंशतिः॥ य
रलव शषसहेत्यष्टौ यमाश्चत्वारः॥ प्रथमयमद्वितीययमादिभेदेन विभजनात्॥ अत एव कुं खुं गुं घुं इति यम
चतुष्टयं न्यासादावुदाहृतं कचटतपाः कुः॥ खछठथफाः खुः इत्यादिपरिभाषा पाणिनिमतेन तदुत्तरस्याशरीरस्था राम

९९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिकं पंक्तिस्वरं शं नतात्पर्यकं चेदमिति ध्येयं अनुस्वारविसर्गौ कॅपाश्चात्त्यास्तु ःस्पृष्टस्य वर्णानां प्रसिद्धः
॥ ईलेवौ ॥ तिइस्य त्रिषष्टिः॥ ऌकारस्य प्लुतस्याभावात्तेन सह चतुःषष्टिः॥ नदेनतु क्ते संभवत इति॥ ॥ हयवर
ट्सूत्रे दीराद्कारोप्याह॥ वर्गान्त्येनं त्यन्त्ये रेतयो मध्यवर्त्तीनासिकास्थानो यम इति॥ यत्तु कश्चिदाह यमा आदे
शाः नचनेषामानुनासिक्यप्रसंग इत्तत्स्सद्यंनीत्यादौ परेनुनासिकस्यानुनासिकादेशापत्त्यानेवरोधो नेवप्र
योजनीयमिति भाष्यविरुद्धमेतेनिवाच्यं॥ व्यवस्थितविभाषाश्रयणादिति॥ ननु छं प्रागुक्तप्रातिशाख्यनारदी
याशिक्षादिसकलग्रंथविरोधेन आदेशपक्षस्यागमपक्षादेवोपगतत्वात्तद्व्यवस्थितविभाषाकल्पनस्य निर्मूलत्वा
देवैतेन एतदीयपक्षेपि यमागमपक्षेरा अनुपसर्गाद्दृश इत्यादौ चवर्गाभावं दवीकृत्य अतुल्याभावं साधयंतस्त
दनुगामिनोपि परास्ताः॥ नारदेन यत्नस्य अजकादेधपसम्पुलभिधानात॥ नसेति तस्य त्रयस्याप्युद्गामेतं ज्ञापवर्ग
णामित्यारम्यपकप्रयोगे रवसंज्ञाति सममभिव्याहारात्रस्पष्टो भेद इति तु प्रसिद्धं शास्त्रे॥ अत एव नव्यं जनप
रस्यैकस्यानेकस्य वाविशेषोस्तीति भाष्यं॥ व्यंजनात्परस्य व्यंजनं परं यस्य तस्येत्येवंभूतस्य च द्विलें सो भेदाविभाषास

भेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(पंचमाध्यायेमत्वर्थीयप्रकरणेऽयंप्रयोगः २)

शा·कौ·
१००

त्येवंपरतेयातत्रतत्रकैयटेनव्याख्यातं अतएवचबहुषुपुस्तकेषुतन्नलोपयत्नाचार्यइति माध्यंग्रंथः।। अ
नुपसर्गाद्वितिसूत्रेपिकेषांचित् अनुलपाठःसंमतएव।।पाठांतरंतु अल्पाच्तरं आलुचतरघहनेइतिवत्सो
त्रलादसंहितयावासमाधेयमितिदिक्।।तदेतत्सकलमभिसंधायप्रक्रियाप्रकाशेगुरुत्वरोरुक्तं।।न
नुत्वानमित्यादौतुअनुलंभवत्येवेति।।यम अमुखनासिकाः केवलनासिकास्थानोवेतिमतद्वयं।।नासि
कानासिकास्थानाः।।मुखनासिकावेतिनैत्तिरीयप्रातिशाख्यात्।।अनुनासिकविषयेतुदर्शनद्वयं
।।कृत्स्नोवर्णोमुखेननासिकयाचोच्चार्यतइत्येकं।पूर्वोभागोमुखेन परोनासिकयेतिद्वितीयं।।तद्वे
२४ परित्यात्तृतीयंद्वितीयतृतीयोभागमात्रस्यनासिकालेपितदुपरागात्सानरमपितद्वदेवभासतेतत्थाच
नासिकान्वयस्यभागमात्रविषयतयानासिकावचनग्रहणेनमुखनासिकोवर्णोनगृह्येत।।किंतुम
नविशेषेकेवलनासिकास्थानतयायमाद्यएवगृह्येरन्।।ततश्चविधिप्रदेशेआङोनुनासिकश्छन्दसीत्याद्येय राम
मानुस्वाराएवविधीयेरन्।।बिंदूनोऽननुनासिकस्यादित्यादौलनुवादेअप्रतिपत्तिरेवस्यादित्युराहतथा १००

प४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्या यापः ॥ तस्माद्दर्शनद्वये मुखपदोपादानं सार्थकमिति स्थितं ॥ अथ यसदर्शने तु प्रासादवासिन्यायाद
यत्नेनो भयवच्चनानामपि सिद्धा संज्ञा ॥ आन्तरतम्याद्विविधप्रदेशेषु यथानुस्वाराणामप्रवृत्तिः ॥ तथाव
मुखशब्दोपादानं न कर्तव्यमिति भाष्ये स्थितं ॥ मुखवचनस्य वोक्ते तु कचटपादीनामपि स्यात्ततश्च श
ङ्कस्त्यत्र कलोपः स्यात् ॥ पक्षस्त्यक्तकारलोपः स्यात्तत्र सम्भिन्यादेपलोपः स्यात्ते ओदनपाकित्यादाव न ३
नुनासिकस्य ङ्कि रु लोरिति दीर्घः स्यात् अनुपश्चान्नासिकाव्याप्रियते यस्मिन् नासिकायाः पश्चान्मुखव्या
प्रियते यस्मिन्निति वान्वर्थसंज्ञेयं तेन नासिकाव्यापारस्य भागविषयकत्वस्पृवनान्त्रा प्रासादवासिन्यायस्या
विषयोपपि निष्ठितं ॥ एतेन सूत्रे प्रत्याख्याते तु शङ्काप्रदेशवाक्ये स्थेव प्रागुक्तस्य नासिकामनुगतस्य
स्यावायोगस्याश्रयणेन सकलेष्टसिद्धेरिति दिक् ॥ ॥तुल्यास्यप्रयत्नं सवर्णं ॥ ॥ताल्वादिस्थानमाभ्य
न्तरप्रयत्नश्चेत्युभयं यस्य येन वर्णेन सह समानं स तस्य सवर्णो बोध्यः ॥ संज्ञाप्रदेशाः अकः स
वर्णे दीर्घ इत्यादयः ॥ यद्यपि तुल्यास्यं मितं तुल्यमित्यवयवार्थः नैव योधर्मविषमूलमू[illegible]लसि तानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाम्यस्तार्थतुल्यप्राप्यवधानाम्यसमसमितसंमितेषु॥ इति सूत्रे ण तुल्याशब्दान्संमिते यदिधान
त॥ तथाप्यर्थसदृशमात्रे रूढः शब्दः॥ आस्यंति उच्चारयंत्यनेन वर्णानित्यास्यं॥ अस्य सेवयतो॥ वाल्कुल
कात्कारतोयपत॥ यद्वा॥ आस्यं ईते अन्नं प्राप्यद्रवी भवतीत्यास्यं॥ अन्येष्वपीति उत्पन्न्यपः॥ अथवा
अन्नेन द्रवीक्रियत इत्यास्यं॥ अंतर्भावितणपर्थात्कर्मणिण्यत्॥ परितःस्वरितः पारिरवेतिवत्॥ तत्रभवमा
स्य●तात्वादिस्थानं शरीरावयवकाघ्वत॥ ग्रस्येति लोपे इह लोप मा भूदिति यलोपः॥ न्याज्झोपुसस्थानिव
द्भावः शंकाः॥ यलोपे कर्त्तव्ये तन्निषेधात॥ प्रकृष्टो यत्नः॥ प्रकर्षश्चाभ्यंतरत्वं प्रारंभयत्नो वा प्रयत्नः
६३ ॥ आभ्यंतरप्रयत्नो ॐ वर्णाप्रारंभकालएवव्याप्रियते॥ तथा च तुल्यौ स्थानप्रयत्नौ यस्येति द्वंद्वगर्भो
बहुव्रीहिः॥ पक्षांतुल्य आस्ये प्रयत्नो येषामिति त्रिपदो बहुव्रीहिः॥ आस्ये इति विशेषणाद्वाह्यप्रयत्नव्यु
दासः॥ आस्ये इत्येकत्वं विवक्षितं॥ तादृतां तास्य शास्रोपादानसामर्थ्यात्तेन भिन्नस्थानानामपर्योग्र
दासः॥ पक्षांतुल्यः आस्ये तुल्यास्याः॥ मध्यरल्यं कादिल्योस्साधुः तुल्यास्याः प्रयत्नो यस्येति विग्रहः॥ पक्षा राम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।। आस्ये प्रयत्नः आस्यप्रयत्नः स तुल्यो यस्येति।। एकत्वविवक्षा किं प्राग्वत्।। तदेवं समासवनुद्य
मपि भाष्ये स्थितं।। हृहृगभोवकुंश्रीहि विप्रदोषा पूर्वभागे तस्मुखगर्भः उत्तरभागे वेति तुल्यशब्दस्य सं
बंधि यारूत्वाभ्राये न सह तुल्यास्यप्रयत्नेन सह सवर्णामिति लभ्यते।। न हि मातापुत्र्येनुक्ते स्वसुतमा
नाय्यायां पुत्रस्य नेकिंतु पुत्रकस्यैव मातेति द्रिक्।। ।।तुल्यस्थानमिति किं।। तुल्यप्रयत्नानामपि कचटतपा
नां मा भूत् तेनेतत् मैत्र्यत्र झरोझरीति परकारलोपो न भवति।। यत्नग्रहणां किं।। चकारशकारयोर्मा भूत् तेस
ति हि सावर्ण्ये वाक्श्चोतती त्यत्र शकारलोपः स्यात्।। आभ्यंतरत्वविशेषणमप्येतदर्थमेव।। आस
हि आस्यमात्रेण विवारत्वादिबाह्यप्रयत्नसाम्यं च यो रपि तु आस्यशास्त्वमहाप्राणत्वकृतोभेदोस्ती
ति [redacted] चेत्।। किं ततः।। न हि सर्वप्रयत्नसाम्यं विवक्षितं तु यकं ऋऋः कि तरस्यापिसिद्धिप्रसंगात् कऽ पो
रपवाद्यप्रयत्नभेदात् सर्वप्रयत्नसाम्यं हि लिवस्य स्त्वेने वा प्राप्तिनतु परेण।। न याव सवर्णसंज्ञाप्रणयनम
पि व्यर्थं स्यात् अणुदित्तुल्यास्यप्रयत्नस्येत्युक्तो सर्वसामंजस्यात्।। झरोझरीत्युक्ते हलोपमायमीत्यत्रेवयय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संव्यप्रयत्नस्यामाहात्म्यमित्यादौ मकारस्येव शिरश्छिन्नत्यादौ ङकारस्यापि लोपो न स्यादिति हि सिद्धान्ते सव
र्णग्रहणं कृतं॥ सचाव्याक्षिप्तो यो यावत्प्रयत्नसाम्यविवक्षायां तदवस्थ एव स्यात॥ अथ यावद्बाह्यसाम्यं
यावदाभ्यन्तरसाम्यं वा विवक्ष्येत एवमपि मधुलिट् स्थानमित्यत्र रुरोरुरीति सलोपः स्यात सकारथकारयोः
श्वासाघोषविवारमहाप्राणालरूपबाह्यप्रयत्नवत्तुल्यत्वेनापि साम्यात॥ अथ यथास्थानप्रयत्नविवेकः॥
अकुहविसर्जनीयाः कंठ्याः॥ इचुयशास्तालव्याः॥ ऋटुरषाः मूर्द्धन्याः॥ लृतुलसा दंत्याः॥ उपूपध्मानी
या ओष्ठ्याः। एऐ कंठतालव्यौ ओऔ कंठोष्ठ्यौ वकारो दंतोष्ठ्यः जिह्वामूलीयो जिह्वामूलस्थानः अ
नुस्वारो नासिकः। यत्नो द्विधा आभ्यंतरो बाह्यश्च। तत्राभ्यंतरश्चतुर्द्धा स्पृष्टता ईषत्स्पृष्टता संवृतता वि
वृतता चेति तत्र स्पृष्टता स्पर्शानां। ईषत्स्पृष्टता अंतस्थानां। ह्रस्वस्यावर्णस्य प्रयोगे संवृतता शास्त्रीय का
र्ये तु विवृतता प्रतिज्ञायत इति अइउण् सूत्रे प्रतिपादितं। वृत्तिः संवृतादि इतितु प्रातिशाख्योक्तत्वान्न सर्वसाधार
णं। ऊष्मणां स्वराणां च विवृतता। यथा चतुर्णामप्याभ्यंतरत्वं वर्णोत्पत्तिप्राग्भावित्वात् तथाहि॥ ना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन्नुरःप्रभृतीनि स्थानान्याहंति ततो वर्णस्य तदभिव्य
क्तिरूपध्वनेर्वा उत्पत्तिः तेषूत्पत्तेः प्रागवस्था जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक्स्पृ
शन्ति तदा स्पृष्टता ईषद्यदा स्पृशन्ति तदा ईषत्स्पृष्टता समीपावस्थानमात्रे संवृतता दूरत्वे विवृतता अत एव स्थु
यत्नानां तालव्यत्वाविशेषेऽपि तालुस्थानेन सह जिह्वाग्रादीनां च वर्णोच्चारणोत्कर्षे सम्यक्स्पर्शः यकारे
षत्स्पर्शः शकारेकारयोस्तु दूरे वस्थितिरित्यादि अनुभवं शिक्षाकारोक्तिं चानुसन्धाय विवेचनीयं भाष्यकारास्तु
नाकृत्वा विना सप्रयत्ना व्याख्यानाद्वसरे ऊष्मणां स्वराणां च ईषद्विवृतत्वं विवृतत्वं चेति वैलक्षण्यं कस्मादिति तद
प्यनुभवानुसारेणैव इति सहृदयैराकलनीयं। बाह्याः प्रयत्नाः पुनरेकादश विवारः संवारः श्वासो नादो घोषोऽघोषोऽ
घोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। एते च वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्रा
णाख्ये वायौ उत्पद्यन्ते। अत एव बाह्या इत्युच्यन्ते। गलबिलस्य संकोचात्संवारः। तस्यैव विकासाद्विवारः। एतेन
संवृतविवृतत्वरूपाभ्यां आभ्यन्तराभ्यां भिन्नावेवैतयोः समीपदूरावस्थानात्मकत्वादित्यवधेयं। तत्र वर्गाणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा·कौ १०२

ठाः३ प्रदाना३ यमा३

प्रथमद्वितीयाश्चाघक्षा विसर्जनीयजिह्वामूलीयोपध्मानीयाश्च यमौ च प्रथमद्वितीयौ विवृतकंठाः श्वासानुप्र
दाना अघोषा वर्गयमानां प्रथमेऽल्पप्राणाः इतरे सर्वे महाप्राणाः॥ वर्गाणां तृतीयचतुर्था अंतस्था हकारानु
स्वारौ यमौ च तृतीयचतुर्थौ संवृतकंठा नादानु घोषवंतो वर्गाणां तृतीया अंतस्था अल्पप्राणा यथा तृती
यास्तथा पंचमाश्चानुनासिका मे षाम पवोगुणा इति सिद्धा सुस्थितं संग्रहश्च। स्पर्शा यमा रवयः ᳵकᳶपौ विसर्गः
शाएव च। एते श्वासानुप्रदाना अघोषाश्च विवृण्वते। कंठमन्ये तु घोषाः स्युः संवृता नादभागिनः। अयुग्मा
वर्गयमगा यणश्चाल्पासवः स्मृताः॥ यद्यप्येते बाह्याः प्रयत्नाः सवर्णसंज्ञायामनुपयुक्तास्तथापि अंतरत
म्यपरीक्षायामुपयोक्ष्यंत इतीहाभ्यंतरस्य विशेषणायाव वर्ण्यंते याथातथ्यादिताः॥ न विद्यते प्रयत्नमह
ताव्यवयंते द्वितीयानामसराद्बलादेवताल्वादिस्थानस्य प्रयत्नस्य चलाभाविनिवेन्नं प्रत्येकं व्यापारस्तिरासा
र्थमुभयोरुपादानात्॥ तेन स्थानप्रयत्नोभयसाम्ये सत्येव संज्ञा न त्वन्यतरसाम्येऽपि। एवं स्थितेऽपनस्कलितं
नतस्पष्टत्वार्थमुपन्यस्यते॥ अष्टादशस्य वर्णाः परस्परं सवर्णाः एवामिवर्णीवर्णौ ऋकारा अष्टादशात्म

राम १०३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्णास्तु ह्रस्वोत्तित्रिंशन्मिथः सवर्णाः ऌवर्णस्य दीर्घा न सन्तीत्युक्तत्वात्॥ ऋऌवर्णयोर्मिथः सव
र्णस्योपसंख्यानाच्च एवं ऌह्रस्वस्य मिथः सवर्णाः॥ ननु एकारैकारयोः ओकारौकारयोर्वा मिथः सवर्णयोर्य
र्थ्यैवैतत्तथा अइउण् इत्यत्रैव प्रतिपादितं॥ अकारेणाद्येचां न सावर्ण्यं प्रयत्नभेदादिति इहैवं भाष्ये स्पष्टं॥ स्त्रे३
अत एव एदैतोरपि शकारेण न सावर्ण्यमिति तेषां नाकृता [redacted] मिति स्त्रोदाहरणत्वं नास्ति न चात्र स्था
नभेदेन निर्वाहः॥ एचाम कारेण सह कंठस्थानसाम्यात्॥ एदैतोः शकारेण सह तालुस्थानसाम्यात्तेन
ह्यपि यावत्स्थानेन तत्साम्यं विवक्षितं ञमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः॥ यवलानां सानुनासि ख्र५
कनिरनुनासिकानामसावर्ण्यापत्तेश्च॥ नहि नि रनुनासिकानामपि नासिका स्थानं॥ येन सर्व [redacted] साम्यं
स्यात्॥ ननु नक्तितानां स्पर्श इव लात्तानां दिसाम्यमात्रं लभ्यते॥ ओष्ठास्य प्रतिमाक्त्त कलकाद्रि ञ्यासंका
कलकंचक्रीवा याउच्चन प्रदेशाः॥ यंकंठमाणिरित्यावस्यते॥ तत्कथं नासिकास्थानभेदेनासवर्णत्वमापा
द्यत इति चेन्न॥ नासिका हि न बाह्यावर्णोत्पत्तौ निमित्तं॥ तत्र जिह्वाग्रादिव्यापाराभावात्॥ किंतु अंतरास्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विवृतं च प्रांक्लिपराणक्वर्णवत्तत्संवद्धारेखोविशेषो नास्तिका ॥ सैववर्णोत्पत्तौ निमित्तमितिसिद्धांतात्
॥ तस्मात्स्वरेष्वोष्ठादिभ्यो विशेषात् ॥ वर्ग्या [redacted] वर्ग्येण सवर्णाः तुल्यास्यप्रयत्नत्वात् ॥ रेफस्य रेफ एव सव
र्णः ॥ एवमूष्मणामपि ऊष्माण एव सवर्णाः ॥ ननु मे तुल्यास्यप्रयत्नत्वाभावात् शेषसहानां यथाक्रमं र
कारस्य ककारादिकाराः स्वरकारमते यद्यपि तुल्यास्यप्रयत्नास्तथापि न सवर्णाः ॥ नाज्झलाविति निषेधात् ॥
भाष्यकारमते तु प्रयत्नभेदादेवेति वक्ष्यते ॥ ॥ इहस्थानभेदाच्चासां सवर्णसंज्ञां विधातुं वार्त्तिकमारभ्य
ते ऋकारऌकारयोः सवर्णविधिरिति ॥ होतृऌकारः होतॄकारः ॥ उभयोरन्तरमृऌकारांतमव्यदीर्घोन
संभव [redacted] तीति पारिशेषाद्दृकारः ॥ स्यादेतत् ॥ अकः सवर्णे दीर्घ इत्यत्र ऋति सऌ
वा वचनं ऌति ऌवा वचनमिति वक्ष्यति ॥ तस्मायमर्थः अकः सवर्णे ऋति परे पूर्वपरयोः स्थाने वा ऋ ऋ य
मादेशो भवति द्विमात्रो यः मध्ये द्वौ रेफौ तयोरेकामात्रा अभितोऽज्भक्तेरपरा ॥ ईषत्स्पृष्टश्चायं ॥ तत्र प्रयत्नभे
दादृकारोणाग्रहणादनवच्छिन्ना दीर्घसंज्ञा या अभावात् प्राप्नोत्यं विधीयते ॥ ऌति ऌवेति अयमपि द्विमात्र ईष

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

न्याद्दृश्यं मध्ये द्वौ लकारौ तयोरेकामात्रा ॥ अभितो ज्भक्तेः परा ॥ पूर्ववद्ग्रासो पंविधीयते तत्र वाक्यवनामि
ति वा शङ्कोशेषं समुच्चयार्थो भविष्यति वा स्याद्विकल्पोपमयोरेवार्थं विसमुच्चये इत्यभिधानात् ॥ तेनाप्राप्त
एव दीर्घो भविष्यति ननु किं सवर्णसंज्ञया नानुवृत्तिर्लृत्वे त्वत्र सवर्णे इत्यनुवर्त्तते न वा अत्र घेहो तल्लकारस्य
२४ न ॠ ऌवर्णयोः सवर्णसंज्ञाविधानं विना नेष्टसिद्धिः ॥ अत्र त्वेदं ष्णुकारो मध्ये ष्णु कार इत्यादावतिप्रसंग इति चे
त् ॥ न प्रथमवार्त्तिके ऋति ऌति पनी पक्ष ऋत इति पंचम्यंतपाठे नैव सर्वसामंजस्यात् ॥ सवर्णे इति च पूर्ववार्त्तिके
नुवर्त्तते तेन धात्वंशादित्यादौ नातिप्रसंगः द्वितीयवार्त्तिके तु सवर्णे इति निवृत्तं ऋतः इत्यनुवर्त्तते तस्माद्द्व ६५
: सवर्णे इत्यत्र अवश्यं कर्त्तव्ये न वचनद्वयेनैव सकलनिर्वाहाद् ऋकारऌकारयोः सवर्णविधिनितीहत्वं वा
र्त्तिकं व्यर्थमिति मैवं रहत्यमेकं वार्त्तिकमाश्रित्य पाणिवचनद्वयप्रत्याख्यानस्यैव न्याय्यत्वात् ॥ तथा
हि ॥ तद्वचनद्वयं कुर्वतापि रेफद्वयलकारद्वयगर्भयोर्लृ द्विधेयोरेवत्वेतावदेष्टव्यं तन्निर्वाहार्थं वर्ण
समाम्नाये तौ पठनीयौ अन्यथाहि विधानमात्रमनयोः स्यान्नलत्वकार्यं युतः ॥ ननु द्विधाने हि अवश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि.कौ.
१०५
तिपरिभाषया ऋवर्ण इत्युपतिष्ठते ननु ईषत्स्पृष्टस्थानेत्वान्माभूत् प्लुतः। विवृतस्य तु ऌकारस्याच्
त्वेन प्लुतः सिद्ध एवेति चेन्न। सर्वो विवृतः प्लुतः सिद्धः ईषत्स्पृष्टौ तु ऌकारौ रेफद्वयलकारद्वयगर्भौ न सि
ध्यतः। अत एवाच्संज्ञामात्रेणापि न निस्तारः। ग्रहणकशास्त्रप्रवृत्तेस्तावन्मात्रेणानिर्वाहात् किं
तु ऋ ऌ सूत्रपाठ एव कर्त्तव्य इत्युक्तं। सति ऌवर्णस्य पाठे ताभ्यां त्रिमात्रयोरपि ग्रहणान्न प्लुतसंज्ञा
या सत्यां परे ईषत्स्पृष्टौ ऌकारौ भवतः। एवं स्थिते षाष्ठकं च नद्वयं मा क्ता। न द्विधे ययोरपि दीर्घतया
ऋकः सवर्णादित्यनेनैव सिद्धेः। ननु स्थानेऽन्तरतमपरिभाषया विवृतस्य स्थानिनो विवृतावेव दी
र्घौ स्यातां न त्वीषत्स्पृष्टाविति चेन्न। रेफद्वययुक्तस्य स्थानिनो रेफद्वययुक्त एवादेशः स्यादि
इत्यपि सिद्धं भवति। तथा च किं रेफद्वययुक्तत्वमादर्त्तव्यं किं वा विवृतत्वमित्यत्र विनिगमकाभा
वेन पर्यायेणोभयप्राप्तौ सिषाधयिषितस्य रूपद्वयस्य निर्वाहात्। ऌकारे विकल्पविधिहूकारान्तरतमो राम
विवृतदीर्घः कदाचिद्हूकारान्तरतमो ऌकारद्वयगर्भ ईषत्स्पृष्टः इति सकलेष्टसिद्धिः। तदेवं षाष्ठवच १०५

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

नद्रूपं न कर्त्तव्यमिति स्थितं॥ ननु तदेवास्तु संज्ञाविधानं तु मास्त्विति चेन्न॥ वचनद्वयारंभे गौरवस्य
स्पष्टत्वात्॥ किंच॥ संज्ञाभावे अन्त्यकः उपसर्गादृति उरण्रपरहस्मादिषु अकारेणाल्काराग्रहणं
न स्यात्॥ न चैवं सिद्धान्तेपि तवल्कारस्याकारपरत्वप्रसंगः प्रत्याहारत्वस्य वक्ष्यमाणतया लपर
५४ त्वसिद्धेः॥ आदितो लृदितौ धातूनामनुबंधकार्येषु संकरकृन्न भवति॥ धातूपदेशेष्वगनुवं
धकारणामपानि॥ विविधिषामे क्वापि ऋगनुवादस्यासंभवात्॥ अग्रमथा हि सवर्णेनोदित एव
लृदित एव वा पठितो विधावपि ते न तद्रूपेणानुवदेत्॥ संप्रैसे कलृप्ते वैकृष्या अयपणा योगात् ना ५५
ज्झलौ॥ अज्झलौ मिथः सवर्णौ न स्तः॥ अकारहकारयोः इकारशकारयोः ऋकारषकारयोः लृका
रसकारयोश्चेति स्यात्तचतुष्टये पूर्वस्य चैतत्प्राप्तं सावर्ण्यमनेन निषिध्यते॥ तेन आनडुहं चर्मवै
पाशो मनस्यदत्वमस्येतिषे निहकारशकारयोर्लोपो न॥ अन्यथा हि दध्यत्र नेन दीर्घाणामिव
हकारशकारयोरपि ग्रहणं स्यात्॥ तथा दंडहस्तो दधिशीतं कुंतषेहू रसत्वासे सवर्णदीर्घः स्या

लं॰ कृं॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाको.
१०६
लि:३

मयात्मंर

त्वादृषिसांद्रमिन्यादौ यत्रादेशश्च स्यात् । इह च तु लोकस्यापि न सवर्णोस्तीति व्याक्यार्थो नियामः ।
संज्ञारंभवैयर्थ्यापत्तेः विहितप्रतिषिद्धत्वेन विकल्पे तुल्यावात्नु त्या स्यासवर्णविन्येवसूत्रयेत ॥ ना
ज्झचामज्झिहं सांहल्भिः सावर्ण्यं निषिध्यते ॥ नाज्झलावित्येव सूत्रे सवर्णसंदीर्घस्य ग्रहो ह्रस्व इति पू
र्वसवर्णादेशस्य च निर्देशात् ॥ नन्वृत्वे वाच्यमिति दृष्टो न तु ह्रस्वः ॥ तावतैव दृष्टसिद्धौ रात्विति ह्रस्वो दीर्घनि
देश एव ज्ञापको ऽस्तु । तेन हि अचामज्भिः सावर्ण्यं निषिद्धमिति ज्ञापिते परिशेषात् इत्येलोमेथोनि
षेध एव पर्यवस्यति । दृहोर्मीसवर्णा इति ज्ञापकाश्रयत्नु नाज्झलावित्येव कृतो न सूत्रितमिति ॥ तत्र ऋ५
॥ कर्तृवृद्धवृषिसांद्रमिन्याद्य सिध्यापत्तेः ॥ ऋकारऌकारयोरनेन तुल्यातनग्रहणं सूत्रातिरिक्ते पूर्वएवा ऋ४
ज्ञान्युक्तत्वात् ॥ अस्तु वा परेण तन्न थापि अजपेदेपा व्यक्तिर्गौरवमेव स्यादिति अत्र ग्रहणमप
नीयाणाग्रहणं क्रियतामिति शंकायां गर्भस्थावैरोवगनत्वात् ॥ शत्वं शेतु व्यक्तिलाघवे सत्यापि व
र्णोच्चारणे विशेषानाश्रीत्येवोक्तं एवस्तुतस्तु नाकृशलाभित्येव सूत्रयितुमुचितमस्मादेतत् ॥ शां गाम:
१०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

शाभिरपि सावर्ण्यं निषिध्येत ॥ ते हि इकारादिभिर्गृहीतत्वादच्संज्ञकाः हल्रूपदेशाद्धल्संज्ञा ॥ न
चास्मादेव निषेधादिकारादयो न सवर्णा इति वाच्यं । तद्वाक्यार्थबोधात्प्राक्पदार्थोपस्थितेराव
श्यकतया तस्याम् अवस्थायामिकारादिभिः शकारादेरुपस्थापनस्य दुर्वारत्वात् ॥ तत्र स्वपरस्नानाः ॥
रामच्छब्दः ॥ यशस्सारमित्यादौ मृते मरीत्वस्य प्रवृत्तिर्न स्यात् ॥ तत्र श्लोके कत्वशात्त्रयं श्रूयेत ॥ इष्ट
नेनुद्दपां तथा च पूर्वपक्षवार्त्तिके ऋलृलोः प्रतिषेधे शकारप्रतिषेधो ऋलृत्वादिति ॥ अत्र शंका
रग्रहणां शरामुपलक्षणार्थं किंच अवर्णस्याष्टादशधा भिन्नस्य परस्परं सावर्ण्यं न स्यात् ततश्च दंडा
शमित्यादौ दीर्घो न स्यात् ॥ तथा हि हकारेण ग्रहणाद्धकारो हल् अस्तु पाठस्त्वाच् ॥ न चास्मिन्नेव सू
त्रे एतस्य प्रवृत्तिः ॥ येन ग्रहणक शास्त्रमसावर्ण्यं न प्रवर्त्तेतेति ॥ ॥ अत्र सिद्धांतं वार्त्तिककार एव
ह ॥ सिद्धमनच्त्वाद्वाक्यापरिसमाप्तेर्वेति ॥ ॥ तत्र सूत्रप्रत्याख्याने नोक्तं प्रथमवार्त्तिके निषेधेनु ॥ त
थाहि शिक्षावाक्यं विवृतमूष्मणामिति योगो विभज्यते ॥ तत्र ईषदित्यनुवर्तते ॥ स्वराणां च [illegible] विवृ

त्यत्र १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्व २ त्प ३

सि·कौ·
१०७ तमित्यनुवर्त्तते॥ ईषदिति निवृत्तं॥ तथा च प्रयत्नभेदाद्ध्रस्वस्वरयोः सावर्ण्याभावे किं सूत्रेण॥ त
थात्वशास्त्रमनर्थकत्वादेव सिद्धमित्यर्थः॥ उपलक्षणं चैतत्॥ अकारस्याहल्त्वादित्यपि बोध्यं॥ सूत्रारं
भमप्युपेक्ष्येदं व[illegible]शेष्याः सूत्रमेवनारंभणीयमित्यर्थः॥ ईषदित्यस्याननुवृत्तिं समानप्रय
त्नतां च स्वीकृत्य सूत्रारंभपक्षे त्वाह॥ वाक्यापरिसमाप्तेर्वेति॥ अयमाशयः इह पूर्ववर्णानामु
पदेशः॥ तत इत्संज्ञा ततः आदिरन्त्येन सहेतेति प्रत्याहारसिद्धिः ततो नाज्झलाविति त्वेन तद्वाक्या
र्थबोधः ततोऽपवादविषयपरिहारेण सवर्णसंज्ञानिश्चये सति ग्रहणकशास्त्रप्रवृत्तिः॥ न त्वेत
त्सूत्रनिष्पत्तिसमये अन्यथा एतत्सूत्रे णौ च इकारशकारादीनां सावर्ण्यनिषेधादिकारेण शका
राग्रहणे सति अक्कुहलादिति हेतोरसिद्ध्या तदीयः पूर्वपक्षो असंभवदुक्तिक एव स्यात् अयपक्षा
र्थज्ञानस्य वाक्यार्थबोधहेतुतया एतद्वाक्यस्यापदार्थबोधकाले एतद्वाक्यार्थग्रहणाभावादिह
सूत्रे इकारेण शकारग्रहः स्यादेव ततः पूर्वसावर्ण्यनिषेधाग्रहादिति [illegible]तः सूत्रग्रहणकशा राम
१०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

त्रमेवननिष्पन्नमित्यपिकथंनपर्यालोचयेः॥नन्वेवंतुल्यास्यप्रयत्नंनाज्झलावित्यादौअकःस
वर्णइतिदीर्घोपिनप्रवर्तेतेतिचेन्न॥सवर्णसंज्ञाघटकतरकालेप्रवर्त्तमानस्यदीर्घशास्त्रस्यदंडाढकाद
विवेहाप्यप्रतिबद्धप्रवृत्तिकत्वात॥उद्देश्यतावच्छेदकरूपाक्रान्तत्वाविशेषात्तन्नचसवर्णदीर्घविधाना
त्यवस्थितं। अत्रोच्यते। ग्रामणींगमिति परिभाषाया अनित्यत्वं ज्ञापयितुं सन्तुक्ग्रहः। तथाहि।
समानाश्रये इति प्राचां ग्रंथानुरुत्य प्रागुक्तं न तु क्षोदक्षमं। व्याश्रयेष्वपि च कुधात स्वीकारात्।

३ प्रत्यापत्तिः समर्थानामिति च भाष्ये। अत एव ३

घ

कारेकार

श० कौ० तथा च कैयटेन असिद्धवत्सूत्रे भुन इत्यत्र वार्णादांगस्य बलीयस्त्वात्पूर्वं कादेशं बाधित्वा ऽल्लोप उक्तः
:। न च तत्रोभयोरकारांशे समानाश्रयत्वमस्त्येवेति वाच्यं। विश्नः स्यो न इत्यत्रापि द्धकारांशस्य सा
२०१ म्येन व्याश्रयत्वोपन्यासविरोधात्। किंच। अंगस्य आ ऋ अ न घोः शी ओ रुट् अचः परस्मिन् ये न वि
धिः उपेयिवाननाश्वान् आ ङ जादीनां अजादेर्द्वितीयस्य अदसो सुलोपश्च सार्वधातुकमपि
त् उपसर्गाद्ध्रस्व ऊहतेः स्नुक्रमोरनात्मनेपदनिमित्ते इत्यादिसूत्रेषु हरदत्तकैयटादिसकलग्रं
थाः समानाश्रयतां क्वचिदादत्सकृद्विदनादत्य प्रवृत्ता इति स्पष्टमेव सिद्धांतपरिशीलनशालिनां।
ते वाष्ठभाष्ये प्रथमाह्निके वार्णादांगमिति परिभाषायाः प्रयोजनान्यपि व्याश्रयसाधारणान्ये
वेति तस्माद्बहिरंगपरिभाषा ऽकृतपरिभाषयोरिव वार्णादांगमित्यस्या अपि अनित्यत्वमेव श
अचः ४ रणं तत्र च सत्तुक्ग्रहणेन ज्ञाप्यते न चैव परस्मि [redacted] न्पूर्वविधाविति स्यानिवद्भावेन तु कं गा
रयितुं सः अन्यार्थतया ऽवश्यकर्त्तव्येनाचङ्ग्रहणेन गतार्थत्वात्। एवं चान्यार्थं क्रियमाणं सत्तु
क्ग्रहणं अकृतव्यूहास्त्रस्याप्यनित्यतां कामं ज्ञापयतु प्रकृतसूत्रे विश्न इति प्रत्युदाहरणं तु य रामः
थाश्रुतरीत्या एवं स्थिते न ङो ङित्वस्य गुणनिषेधे चरितार्थत्वाद कृतव्यूहपरिभाषया ज्ञाप २०१

५ न माङ्योग इति सूत्रस्य कैयटग्रंथोप्येवमेव आतोनुपसर्गे क इति सूत्रे भाष्यप्येवम् ५

क्रांतरमोस्थेयम्। तत्त्वप्रत्यापत्तिवचनं उत्तरपदग्रहणं समर्थग्रहणं वा तेभ्यो लघुत्वा अणुग्रहणमे
वेति तु निष्कर्षः। आचारक्विबंतार्थप्रत्ययग्रहणं न च ममादिवाधनार्थमप्राप्तविभाषार्थं वोत्तरपद
ग्रहणमिति हिस्व्याख्याते। मपर्यंतानुवृत्तिरेव त्वाधिके ति हरदत्तोत्प्रेक्षा तु अंतरंगस्यापवादत्वाध्यला
द्युक्ते ति सप्तमे वक्ष्यते। एवं चघामाघंतर्गणसूत्रे विध्व गित्युत्तरपदलोपश्चाकृतसंधेरित्यत्राकृत
संधिग्रहणमप्यनावश्यकं। वीक्षमाणादिभ्यः कृतसंधिभ्य एव तद्धिता इति स्पष्टीकरणार्थं वा स्त्रः ए
वं स्त्रियोः पुंवदिति सूत्रे न ह्येषा परिभाषा सर्वत्राश्रीयते इति कैयटः समीचीन एव। आभात्सूत्रस्थ
कैयटस्तु निमित्तापाय परिभाषा भाष्यासंमतेत्येवं रूपआपाततः। ह्रोः श्लु सूत्रे न हीदं वचनं ना
प्रिमायदृत्तेवं रूपो हरदत्तग्रंथो व्यापातेएवं समर्थानामिति सूत्रे परिभाषा परिष्कारस्य स्वयमेवकृ
तत्वात्। अथवा उक्तपरिभाषयोर्मध्ये कृतव्यूहपरिभाषैव लाघवादाद्रर्त्तव्या न तु कृतमपीति गौर
वादित्येवं परतया कथंचिद्व्याख्येयः। फलं तु निर्विवादं ज्ञापकांतराणामपि सुलभत्वात्। तथा। चा
विति सूत्रे दीर्घं विदधदिहज्ञापकं अंतरंगानस्यि णिकृतेअनती चइत्यादौ कथं दीर्घस्य विषयलाभः। लो
किकन्यायो पीह सुवचः। लोके हि निमित्तमुभयविधमपि दृष्टं। कार्यस्य स्थितौ नियामकं तदनियाम
कं च। आद्यं यथा न्यायनयेऽपेक्षाबुद्धिः तन्नाशे न द्वित्वनाशाभ्युपगमात्। तथा वेदांतनये प्रारब्धस्य वि

१कैयटादिभिः॥ वालिसुग्रीवयोर्युध्यमानयोर्भगवता वालिनि हतेपि न सुग्रीवस्य वालिनः ४

श०रत्न० लोपस्थितिनियामकत्वं तु पाघेः स्फटिकलोहित्यादिस्थितिनियामकत्वं च असिद्धमेव। द्वितीयं तु दं
डादिनाशेपि घटनाशादर्शनात्। एवं स्थिते लक्ष्यानुरोधेन हापि द्वैविध्यं कथं न भवेत्। तथा च य
२०२ स्य लक्षणांतरेण निमित्तं विहन्यते नासावनिमित्तस्य कचिदाश्रयणं किंचान्येष्वेवं द्वये सिद्धांते
लौकिकद्विविधव्यवहारउपष्टंभकत्वेनोदाहृतः प्रावल्यं व्यवहरंति। भगवत्सहायैः पांडवैर्जये ल
ब्धेपि पांडवानां प्रावल्यं व्यवहरन्ति चेतीतिदिक्। स्यादेतत्। यदि छो रिति सतुक्कनिर्देशस्तर्हि रा
ल्लोपे तस्यैवानुवृत्तिः स्यात्। तथा च कूः कुरौ कुरः इत्य[redacted]त्र लोपो न स्यात्। वितुक्कत्वात्। न चानु
वृत्तिसामर्थ्यात्तुकं विनैव तत्र ग्रहणं तो राधो हिंसायामित्यत्रात इत्यनुवृत्तेपि असवर्णे इवितवाच्यं।
वकारमात्रान्वयस्यापि सुवचत्वात्। यत्तु सतुक्कवितुक्कौ द्वाविह निर्दिश्येते इति। तन्न। समाहारद्वंद्वे
एकवचनापत्तेः। इतरेतरयोगे बहुवचनापत्तेः। छकारयोः समाहारे समासं कृत्वा वकारेणेतरेत
रयोगद्वंद्वं करिष्याम इति चेन्न। समाहारे टचू प्रसंगात् यथासंख्यासंभवापत्तेश्च। अत्रोच्यते।
छकारवकारयोः समाहारद्वंद्वे कृते छकारांतरस्य द्वंद्वांतरमस्तु आदेशेपि शद्वयप्रश्लेषः। तथा राम०
चांतरतम्या यथासंख्यन्यायाच्चेष्टसिद्धं। अस्तु वा सतुक्कस्यैव निर्देशः।[redacted]राल्लोपे तु सामर्थ्यात् २०२
केवलस्यान्वयः। न ध्यारव्येति न त्वनिषेधाल्लिंगाच्च। मूर्त इत्यत्र छलोपं विना न त्वप्राप्तिरेव न संभ

वति। एवं मरुतौ घनः इव मरुन्निस्पर्शयोः श्यप्ट्त्वादिनिर्देशा अपि संगच्छंत इति दिक्। अस्मिन्प
क्षेऽचड्व्यस्य प्रत्युदाहरणं नुघूत्वा स्तृत्वेति। अत्र हि ऋुः स्थानिवत्वाद्घणं न स्यात्। ननु स्वाश्र
यमचूत्वं भविष्यति अतिदेशानां स्वाश्रयकार्यानिवर्त्तकत्वादिति चेन्न। विधिग्रहणप्रयोज
नकथनावसरे इह सूत्रे स्वाश्रयनिवृत्तेः सिद्धांतित यिष्यमाणत्वात्। नन्वेवमपि योत्रयट्
एिवधावाश्रीयतेऽचूनासावादेशः। यथ्वादेशः ऊडिति समुदायो नासो यएिवधौ निमित्तमि
ति चेन्न। अनुबंधानामनेकांततया एकांतत्वे पुनरितप्रध्वंसितयाऊकारस्यैवादेशत्वात्।
वतिनिर्देशाद्भावोप्यतिदिश्यत इति वक्ष्यमाणत्वाच्च। एवमभिगत्येत्यपि प्रत्युदाहरणं।
अत्र हि अनुनासिकलोपः परनिमित्तकः तस्य स्थानिवद्भावाद्ध्रस्वस्य पिति कृति तुक् प्राप्नो
ति। अथ परस्मिन्निति किमर्थं। युवजानिः अत्र जायाया निङः स्थानिवद्भावाद्यलोपो न प्रा
प्नोति स्वाश्रयनिवृत्तिरभावातिदेशश्च वक्ष्यत इति युक्तमेव। किंच आघ्रस्य वपादावस्या
घ्रपात्। पादस्य लोपोऽहस्त्यादिभ्य इत्य परनिमित्तको लोपः। ततो गर्गादित्वाद्यञ्। वैयाघ्र
पद्यः। लोपस्य स्थानिवद्भावात्पादः पत् इति पद्भावो न स्यात्। वचनसामर्थ्याद्भविष्यतीति

श.कौ. चेत्यादेनेत्यादावतिप्रसंगः। किंच। पादस्पतस्येति लोपवचनसामर्थ्यात्स्थानिवद्भावाप्रवृत्तौ
२०३ सत्यां द्विपदिकेत्यादौ पद्भाववचनं चरितार्थमिति क्व तस्य सामर्थ्यं। परस्मिन्निति कृते तु येया
घ्रुपघ इत्यादौ पद्भावस्य चरितार्थतया पादेनेत्यादावेकादेशस्य स्थानिवद्भावात्। पद्भावो
नेति स्थितम्। नन्वेकादेशो नाचः किं त्वचोः तत्कथं स्थानिवत्त्वमिति चेन्न। वर्णनिर्देशे जा
तिग्रहणात्। अत एव श्रायसो गोमन्तो चातुरो आनडुहो इत्यादि सिध्यति। श्रेयसोऽपत्यं
इत्यपत्ये इदविकाशिंशपादित्वादृद्धौ सत्र श्रेयसा मांस्याकारादेशः। ततश्च नुम्योऽप्य
णं तेभ्य ओप्रत्यये एकादेशस्यादिवत्त्वात्प्राप्तौ नुमामौ न भवतः। तथा उदवाह उदकं वह ६
तीति कर्मण्यण्। संज्ञायामुदभावः। ततोऽसि एकादेशस्यादिवत्त्वादुत्वे सति प्राप्तो वाह ऊठ्
न भवति। पूर्वविधाविति किं। नेयेयः। नि पूर्वाद्धाञ उपसर्गे घोः किः। धः किः इतश्चानिञ इ
ति ढक्। आकारलोपस्य स्थानिवत्त्वे सति [illegible]कत्वव्यपदेशेन ध्यकत्वं विरुद्धत्वाद्बाधोऽत
। न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते। नन्वेवमपि विधिग्रहणं मास्तु। पूर्वस्येति षष्ठ्या राम:१
कार्यं कर्तव्ये इत्यर्थस्याक्षेप्तुं शक्यत्वादिति चेन्न। पूर्वस्य विधिः पूर्वस्माद्विधिरिति समा २०३

सद्वचनाभावार्थं विधिग्रहणात्। पंचमीसमासे उदाहरणं तु तन्वंतीत्युक्तमेव। स्यादेतत्। पं
चमीसमासे पीष्टत्वं हि विगलय्येत्यादि न सिध्यति। ल्यपि लघुपूर्वादित्ययादेशे कृते ये
अल्लोपस्य स्थानिवद्भावात्। न चारंभसामर्थ्यं। अनुगमय्येत्यादौ मित्त्वचरितार्थत्वात्। अ
भ्यते। एवं स्थाद्विधौ स्थानिवत्त्वमनित्यं। निष्ठायां सेटीति ज्ञापकात्। तथा हि। तत्र सेटी
तिपदं न तावदनिड्व्यावृत्त्यर्थम्। णिजंतात्तदसंभवात्। ननु संज्ञपितः पशुरित्यत्र यस्य वि
भाषेतीण्निषेधः संभवत्येव। स नीवंतेति विकल्पितेट्कत्वादिति चेन्न। यस्य विभाषेत्यत्र एका
च इत्यनुवृत्तेः। अन्यथा दरिद्रितइतीण्न स्यात्। तस्मात्कालावधारणार्थं सेड्ग्रहणम्। इटि
कृते णिलोपो न तु ततः प्रागिति। अन्यथा कारितमित्यादौ णिलोपे कृते एकाच उपदेशा इ
तीण्निषेधः स्यादिति सेटीति वदतो भावः। पूर्वस्माद्विधौ स्थानिवत्त्वे तु न प्राप्नोत्येव निषेधः
णिचा व्यवधानात्। तस्मात्सेड्ग्रहणमनित्यतां ज्ञापयतीति स्थितम्। तथा चाष्टमेऽतद्धिति
सूत्रे हरदत्तः। अनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः निष्ठायां सेटीति सेड्ग्रहणात्। एवं स्था
निवद्भावप्रकरणे व्याख्यातमिति। यद्यपीह प्रकरणे स्वयं न व्याख्यातं तथापि न्यासका

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छ

तं ६२

रा॰ स्त्र॰ रादिभिर्व्याख्यातमिति तत्तूपार्थः। लेखकप्रमादाद्ग्रन्थभ्रंशो वा कल्प्यः। एतेन ओः पुयण्जी
२०८ तिसूत्रे यदत्र वक्तव्यं द्विर्वचनेचीत्यत्रैवोक्तमिति हरदत्तग्रन्थोपि व्याख्यातः। तथा च स्वैका
क्षरत्रे कैयटः पूर्वस्मादपि विधावित्येतदनित्यमिति। माधवाचार्यास्तु। परिग्रहव्याग
तद्ध्यत्रासिद्धतामुद्भाव्य व्याश्रयत्वात्तां परिहृत्य पूर्वस्मादपि विधौ स्थानिवत्त्वमाशं
क्य प्रवेभिदय्य प्रस्तनथ्येत्यादिभाष्योदाहरणबलेन समादधुः। यद्वा॰ त्यपि लघु
पूर्वादिसनेन सामर्थ्यादन्यपदार्थस्य वर्णस्यापेक्षायां वर्णग्रहणे जातिग्रहणाद्वा
मी५ वधानेपि न दोषस्तत्। केचित्तु पंचमसमास इहमास्तु॰ प्रयोजनाभावात्। तथा हि।
१ वेभिदिता॰ मार्तिथिकः॰ अपीपवन्निति प्रयोजनं त्वयं भाष्ये उक्तं। तत्र वेभिदितेति ता
वदन्यथासिद्धं॰ एकाच उपदेशे इत्यत्र विहितविशेषणाश्रयणात्। मार्तिथिके
पि मथितं पण्यमस्येति विग्रहे तदस्य पण्यमिति ठकि तस्य कादेशस्यापीति चे राम:
त्यल्लोपे कृते इसुसुक्तान्तादिति कादेशो न भविष्यति। अनल्विधाविति निषे २०८

निं२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्भावा
धेन स्थानिव संभवात्। इस्येक इत्यत्र स्थान्यादेशयोरकारस्योच्चारणार्थतया वर्णमा
त्रस्य स्थानित्वात्। अस्तु वा स्थान्यादेशयोरकारस्य विवक्षा। न चैवमनल्विधित्वात्कादेश
प्रसंगः संनिपातपरिभाषया समाधानात्। न चापि पचन्नित्युदाहरणं। इरुहि अंते रकारस्य
ङकारस्य चाप्तौ गुणो इति पररूपत्वे तस्य परं अत्यादिवद्भावात् हि ग्रहणेन ग्रहणो स तिसि
जभ्यस्तेति जुस प्राप्तः। णिलोपस्यैकादेशस्य वा स्थानिवद्भावान्न भवतीति वाच्यं। वेत्तेर्लिल
ध्येवानंतरोक्तिः संभवतीति तत्साहचर्यात् दभ्यस्तात् पिलङ एव दे जुसविधानात्। न च सिचा
साहचर्यात् लुङोपि ग्रहणमस्त्विति वाच्यं। विप्रतिषेधे परमिति परसाहचर्यस्य बलीयस्त्वा
दिति। अत एव भवतेर्यङ्लुगंतात् लुङि अबोभूवन्निति माधवः। पंचमीसमासप्रयोज
नं तु यातोऽपीपचन्नित्युदाहरतो भगवतस्तु नेह साहचर्यं नियामकतया संमतं। कृत्वोर्थ
ग्रहणाद्धि साहचर्येण न सर्वत्राश्रीयते इत्युक्तं दीधीवेवीटामिति सूत्रे। तस्माद्यङ्लुकि भुवो
लुङि जुसेवोचितः। आत इति नियमस्य सिचः परत्वमाश्रित्य यो जुस प्राप्तस्तन्मात्रपरता
या माधवेनेवोक्तत्वात् दभ्यस्तात् झस्य जुसो दुर्वारत्वात्। पदितुल्लारादौ इति नियमः सा
तर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जे

शा.द. मात्रापेक्षत्वांदाजुसमावेऽदभ्यस्तादित्यत्। तथा चायो भवुरवो भवदिति पक्षभेदेन रूपं लभ्यते।
२०५ नित्यत्वेन वुको गुणबाधकत्वात्। माधवोदाहृतमवो भवन्निति तु चिंत्यमेव। अं[illegible]देशस्य दुर्ल
भत्वात्। अधीपचन्निस्येतास्मिन् सूत्रे च पंचमीसमास आश्रयणीयः। विगणय्येवाप्यादायति प्रसंग
स्य तु पूर्वोक्ता एवोद्धाराः स्मर्तव्या इति युक्तः पंथाः। ननु पंचमीसमासो मास्त्विति वदतो मतेन
न्वंतीत्यत्रेट् स्यादिति कुतो नोद्भावितमिति चेन्न। बहिरंगस्य यणोऽसिद्धत्वात्। न च नाजानंत
र्ये इति निषेधः। अनंतरे कार्यविधौ यत्राच आनंतर्यमिति कैयटेनाभ्युपगमात्। कथं तर्हि
तन्वंतीति पंचमीसमासोदाहरणं प्राग्दत्तमिति चेत्। हरदत्तमतेनेत्यवेहि। स हि यत्रांतरंगे
बहिरंगे वा अचोरानंतर्यमिति व्याख्यत्। नन्वेवं नपदांतसूत्रे दध्यत्रेति वृत्तिमुपादाय स्या
द्विवद्भावप्रतिषेधसामर्थ्याद् बहिरंगपरिभाषा न प्रवर्त्तत इति मिश्रोक्तिर्विरुध्यते। बहि
रंगे यणि अचोरानंतर्ये न नाजानंतर्य इति निषेधादेव परिभाषाया अप्रवृत्तेः। किं चासं रामः १
योगांतस्य लोप इति सूत्रेऽसिद्धं बहिरंगमिति परिभाषामाश्रित्य क्रियमाणो यणः प्रतिषे २०५
ध इति वार्त्तिकस्य प्रत्याख्यानमिति विरुध्येत। अपि च। लतीति सूत्रे उरण्पर इति परे लचे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णर् णर्

कर्त्र्यर्पमित्यत्र रेफद्वयं श्रूयेते तत्सुक्तं तदपि विरुध्येत। रोरीति लोपसंभवात्। असिद्धपरिभाषा
याश्चोक्तरीत्या निषेधात्। किंच न धातुलोप इति सूत्रे प्रेद्धमित्यत्र भाष्योक्तसंयोगान्तस्येत्यत्र य
३ स णाद्युक्त प्रत्याख्यानभाष्येणापि विरोधः। किंच। एत ऐदित्यत्र पचावेदमित्यादावतिप्रसं
गः। आश्रं क्वचबहिरंगतया स्वरूतं तत्समाधानमपि भज्येतेति दिक्। तस्माद्धरदत्तकृता व्याख्या पूर्वापर
ग्रन्थेन भाष्येण च विरुद्धेति चेत्। सत्यं। अत एवेमां व्याख्यां न धातुलोप सूत्र एवानुपादेयाम
वोचाम। केचित्तु इत्यादिज्ञापकान्नाजानंतर्य इत्यस्यानित्यता माश्रित्य वा कथंचित्समर्थनीयं।
स्यादेतत्। केयपठ मतेपि अचो रिति द्वित्वं विवक्षितं न वा। आद्ये मूलभूततज्ज्ञापकविरोधः। नहि
केसिचत्कोस्त्यादावनंतरेषत्वविधावचोराश्रयणं। द्वितीये तु मूलभूतं ज्ञापकं संभवेत्। य
दीत्यस्य हलं पूर्वेणास्यात्। त तु परत्वेवेति स्थितम्। अथ परेणाग्रहणेहलोपि केचिदंतर्भावं
तु नाम। अजानंतर्यं तु न गतमित्याशयः। तर्हि स्तके यचि ज्ञापक निर्वाहः। अयमत्र इदंच
इन्द्रमित्यादेः परत्वात्सवर्णदीर्घे कृते दुर्वार एव। न ह्यत्रासिद्धं बहिरंगमिति प्राप्नोति।
नाजानंतर्य इति निषेधात्। नन्वंतरंगं वलवदिति परिभाषांतरेणोद्द सिद्ध्यति। तथा च विप्रतिषे

रु

मा.द. धस्सूत्रेऽन्तरंगं चेत्तु पञ्चम्येतोऽशीनामाकुलः सवर्णदीर्घो दिति प्रयोजनं पठितमिति चेत्।
२०५ सत्यं पठितं किंतु बहुतमप्रयोजनानि पठित्वाऽसिद्धपरिभाषयैव गतार्थत्वान्नेयं कर्त्तव्येति
उपसंहृतं। एतेन यत्कृतसूत्रे प॰ म्यां मृद्धे सुदाहरणं त्यणप्रस्तावेऽसिद्धपरिभाषाभाष्यभा
ष्यकारैरुदाहृता मंतरंगबलीयस्त्वे तदुपलक्षणतया व्याचक्षाणो पि केयटः प्रत्युक्तः।
विप्रतिषेधसूत्रस्य भाष्यविरोधात्। तस्मादिह सिद्धांततत्वं मन्यदेव वक्तव्यमिति। उच्यते। अं
तरंगपरिभाषाया निरपवादत्वादसिद्धपरिभाषायास्तु नाजानंतर्य इति सापवादत्वादु
भयोरावश्यकता। विप्रतिषेधसूत्रस्थं भाष्यं तु अभ्युच्चयपरमेवेति भागवृत्तिकाराः। कै
यटलघुविवरणकारादयोप्येवं। वृद्धिविवरणकारास्तु। नाजानंतर्य इति परिभाषा मास्तु
तत्सं४ तज्ज्ञापकतया [illegible] मतं तेनासिद्धपरिभाषाया अनित्यत्वमेव ज्ञाप्यत इत्याहुः। अस्मिंश्च
पक्षे विप्रतिषेधसूत्रस्थं नाजानंतर्य इति भाष्यमपि अनित्यत्वपरतया भंक्त्वा नेयं। अ
न्यथा हि तत्रैवांतरंगं बलीयस्त्वस्य प्रत्याख्यानं विरुध्येत। अत एव वृत्रहन्नो न लोपः सुपूर्व रामः १
रेत्यत्र वृत्रहणामित्यत्र नलोपस्यासिद्धत्वात् स्वेति तु ङेः स्तुपकम्पसंनिपात वाहिरंगप २०५

रिभाषाभ्यां गतार्थता माशंक्य परिभाषाद्वयस्यानित्यतां ज्ञापयितुं तु ग्रहणमित्युक्तं। अत
एव तत्र मिश्रैरप्युक्तं· बहिरंगपरिभाषाया अनित्यत्वात् यासेत्यत्र बहिरंगमप्यसिद्धावत्वम
तरंगे दापि नासिद्धमिति तत्त्वात् प्रतिदीव्ना इत्यादिसिद्धये प्यसिद्धपरिभाषाऽनित्यत्वं स्वी
कृतं। अत एव चाक्षद्यूरित्यत्र यलोपे कार्ये ऊठ् नासिद्ध इति दिक्। एतदपवादश्चाकृत
व्यूह इत्यादिः। उत्सर्गापवादयोर्द्वयोरप्यनित्यत्वे स्थिते लक्ष्यानुरोध एव व्यवस्था हे
तुरिति सर्वं सुस्थं। स्यादेतत्। एवं स्येति संबंधसामान्ये षष्ठी· संबंधश्च द्विविधः। का
नि५ र्यत्वेन निमित्तत्वेन वा। एवं च विधिग्रहणं विनैव समासे फलं लभ्यं। विधिग्रहणे सत्यपि हि पू
र्वस्मान्निमित्तत्वेनाश्रितादिति व्याख्येयमेव। अन्यथा हे गोरित्यत्र गकारात्परस्य विधौ वृ
६२ द्धेः स्थानिवद्भावादेङ्ह्रस्वादिति संबुद्धिलोपः स्यात्। सत्यं। विधिग्रहणं योगविभागार्थ
म्। तेन पूर्वस्य विधौ स्थानिवदेवेति नियमात् त्वाश्रयं व्यावर्त्यते। यद्वा मास्तु योगविभाग
ः। विधिग्रहणसामर्थ्याद्विधिमात्रे स्थानिवद्भावो भविष्यति। शास्त्रीयेऽशास्त्रीये च। तेन प

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्र

शा.द. टयति स्यादेतद्ग्रभावोऽशास्त्रीयोपि सिध्यति। नन्वेवमपि पूर्वसूत्रादेवाविधिग्रहणमनुवर्त्त
२०१ यिष्यते। सत्यं। पुनर्विधिग्रहणाद्द्वितीयो नियमः क्रियते· पूर्वस्यैव विधौ स्थानिवन्नतु पूर्व
परयोर्विधावितिः तेन ईयतुरिति। अन्यथा हि इणोऽनुसिद्धिर्यंच नेचीति यणादेशस्य स्था
निरूपातिदेशाद्द्वित्वे कृते द्वित्वकाले यणोपहारात्पुनः प्रवृत्तिवेलायां व्याश्रयत्वेन वार्णा
दांगं बलीय इत्यस्मिन्नप्रवृत्ते वर्णमात्राश्रयत्वेनांतरंगत्वात्सवर्णदीर्घः स्यात्। न चाकृ
तेव्यूहा इति यणिति वाच्यं। निमित्तविघाताभावात्। कृतेपि यणि स्थानिवत्वेन सवर्णदीर्घ
प्राप्तेः। ततश्च सवर्णदीर्घे कृते तादवस्थ्येत्यनेनाभ्यासग्रहणेन हे ग्रेणाद्भ्यासह्रस्वे दीर्घ
इणः किती ति दीर्घत्वे कृते दीर्घविधानसामर्थ्यादिणो यणभावे ईअतुरिति स्यात्। सिद्धांते
तु पूर्वपरयोर्विधौ स्थानिवत्वाभावान्निमित्तविघातेनाकृतव्यूहपरिभाषया यणि सि
द्धं रूपम्। यद्वा। स्थानिवदिति वतिवलेनाभावोप्यतिदिश्यते। उत्तरसूत्रे द्विर्वचनादि ग्रह राम:
णाल्लिंगात्। विधिग्रहणं तु पूर्वस्यैव न तु पूर्वपरयोरित्येतदर्थमिति दिक्। इह स्थान्यादेश २०१
निमित्तानां त्रयाणां संनिधाना विशेषेपि स्थान्यपेक्षमेव पूर्वत्वं गृह्यते न त्वादेशापेक्षं निमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तापेक्षं वा। वैयाकरणो[illegible]त्यत्रायादेशापत्तेः। तदुक्तं। अचः पूर्वत्वविज्ञानादेचोः सिद्धमिति।
नन्वेवं ससाघेत्यत्र जग्ध्यादेशप्रसंगः। यण्लोपावियति पूर्वविप्रतिषेधेन णिलोपे कृते ततः प्र
त्ययलक्षणेन वृद्धौ सत्यामेकदेशविकृतस्यानन्यतयादिग्रहणेन ग्रहणात्। एवं घात्वादिस
न्धादेशप्रसंगश्चेति चेन्न। आदिघात्वोरपि स्थानिद्वाराऽनादिष्टादचः पूर्वत्वात्। ननु स्थानि
नः पूर्वत्वेप्यादेशस्य किमायातं। नह्यनादिष्टाचः पूर्वत्वं नाम शास्त्रीयं कार्यं यत्स्थानिवदाद ५५
शादिति पूर्वसूत्रेणातिदिश्यतेति चेन्न। अनादिष्टादचः पूर्वत्वमुपजीव्याचः परस्मिन्निति शा
स्त्रप्रवर्त्तयितव्ये स्थानिवदादेश इत्यस्य प्रवृत्तिसंभवात्। तथा चाचः परस्मिन्नित्यतिदेश
र्व शास्त्रीयं कार्यं तच्च पूर्वसूत्रेणातिदिश्यत इति फलितोर्थः। अत एव न पदान्तसूत्रे सव
र्णग्रहणं कृतं। अन्यथा भ्वसोरल्लोपे कृते पश्चाद्भुवन्ननुस्वारो नादिष्टादचः पूर्व इति तस्य
विधौ स्थानिवद्भावविरहात्सवर्णग्रहणमर्थमेव स्यात्। नन्वेवं स्त्रियकंडूरिति न सि
ध्यति। तथाहि कंडूयतेः क्विपि अल्लोपयलोपयोः कृतयोरल्लोपस्य स्थानिवत्त्वेनोवङि कृते
उकारस्यानादिष्टादचः पूर्वस्य स्थाने जातस्योवङः स्थानिवदादेश इति स्थानिवद्भावेनाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कौ·भ· दिष्टादचः पूर्वत्वात् अचः परस्मिन्निति स्थानिवत्त्वे नाकारेण व्यवायात् ऽभावेन स्थानिव
२०८ त्त्वादेव लोपो व्योर्वलीति वलोपाभावे न हलि चेति दीर्घे कृते कंडूवूतिरिति प्राप्नोति। यत्तु यः
स्थानि द्वारा पूर्व उवङ्नतस्याठूकस्य न हि कौ रस्य यस्य च ऊठूर्वकारस्य न स स्थानिद्वारा
पूर्व इति। तन्न। तुस्करितिवत् कंडूइत्यस्य कंडूवू इत्यादेष्यात्। तस्य च कंडूऊ इत्यादेशे कर्तव्ये
स्थानिवद्भावस्य भावात्। उक्तं हि। सर्वे पदादेशा इति। अन्यथा निराघघात्यादित्या...ा
नेद् दोषपि स्थानिवद्भावानापत्त्या हलशेषयित्यापत्तेरिति। अत्रोच्यते। अनादिष्टादचः पूर्वतायाः
स्थानिद्वारकत्वमनित्यं· न पदांतसूत्रे कंडूतिरिति भाष्योदाहरणाज्ज्ञापकात्। आतोनु
पसर्गे क इति सू...त्रे कविधौ सर्वत्र संप्रसारणिभ्यो ...ऽ इति वार्त्तिकस्य तत्प्रघट्टकभाष्यस्य
पर्यालोचनया प्येवमेव लभ्यते। तथा च तत्र भाष्यं। यो नादिष्टादचः पूर्वस्तत्कार्ये स्था
निवत्त्वं हीति। स्थानिद्वारके तु पूर्वत्वे गृह्यमाणे सं पूर्वाः प्रघट्टक एवासंगतः स्यादिति त राम:
त्रैव स्फुटीकरिष्यते· तत्र केयटस्त्वापाततः। एतेन तितउमाचष्टे ता...पयतीति हरदत्त ग्रंथो २०८
पि समर्थितः। तत्र हि टौ टिलोपे कृते तस्य स्थानिवत्त्वादचो ऽस्मितीति वृद्ध्यभावे पि अतउप

ति

धायाइति वृद्धावाकारे कृते तस्य स्थानिद्वारा उकारात्पूर्वत्वेन पुग्विधावुकारलोपस्य स्थानिवत्त्वात्तस्य
ह्रु प्राप्नोति। न च यस्य पुक् आकारान्तस्य नासौ पूर्वः यश्च पूर्व आकारो न तस्य पुगिति वाच्यं। एकदेशविकृ
तस्यानन्यतया सर्वे सर्वपदादेशा इत्युक्तरीत्या चाकारान्तस्यापि पूर्वत्वानपायात्। तस्मात्स्थानिद्वारकं पू
र्वत्वमनिमित्तमेव हरदत्तस्य शरणं। अत्र केचित्। तितापयतीत्यसाध्वेव। तथाहि। तितउणि चुङ्इति स्थि
ते टिलोपश्च प्राप्नोति अत उपधाया इति वृद्धिश्च। उभयोर्नित्ययोः परत्वाद्वृद्धिः। ततष्टिलोपे [redacted] कृते स्थन
एवानादिष्टादचः पूर्वमादतं न तु स्थानिद्वारेति पुङ् ति। तस्मात् णिपि णिचो गुणे कृते एचि वृद्धावाया
देशे तितायतीति भवति। न च तितापि चुङ्इति स्थिते तरंगत्वो कुणो शाप्ययादेशो ति तयतीति स्यादिति
वाच्यं। सपिहि गुणस्य ति वृद्धिरेचीति वाधेनाकुणस्य निमित्तविघातस्यात् परस्यमानत याऽकृत व्यूहपरि ५८
कुणद् भाष्यया पूर्वमन्तरंगस्याप्या [redacted] स्याप्रवृत्तेः। अकृतव्यूहपरिभाषा हि तरंगपरिभाषाया अपवादः
त्युक्तं। न च यथापि गुणस्याचः परस्मिन्निति स्थानिवत्त्वाद्गुणस्य न निमित्तविघात इति वाच्यं। पूर्वस्यैव
विधौ स्थानिवद्भावो न तु पूर्वपरयोर्विधेयत्वात्। तस्मात्तितापयतीत्येव साधु। न तु तितयतीति तितापय
यतीति वा। चङि तु तितापि च चङ् इति पूर्वमिति स्थिते तनोतेर्डः सन्वच्चेति प्रत्युत्पत्तिपक्षे ऽनभ्यासस्येति
द्वित्वनिषेधे टिलोपस्य चङ्परनिह्रासे स्थानिवत्त्वनिषेधे धातुस्वाभावे णिलोपे तस्य स्थानिवत्त्वादसि
द्वत्वाद्धातोर्लोपाभावे दीर्घविधिं प्रति स्थानिवत्त्वनिषेधात्सवर्णदीर्घे ऽतिता दिति भवति न त्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तितापदिति।अत्रेदंवक्तव्यं।परत्वाद्वृद्धिरित्यसंगतं।नित्यत्वेनाट्लोपात्।नचवृद्धिर्नित्या।अचःपरस्मि
न्निति कार्यातिदेशोनवृद्धिआभावपिलक्षणांतरेणप्राप्नुवन्निनित्यइतिन्यायेनानित्यत्वात्।एवंच
हरदत्तोक्तिःसु[redacted]ष्ठेव·किंतुअनित्यमपि[redacted]स्थानिद्वारकंपूर्वत्वमिहनेष्यतइत्यस्मिन्नर्थेप्रमाणं।नन्वे
।तदेवंस्थानिद्वारकं[redacted]स्वतोवास्तु।उभयथाप्यचःपूर्वत्वमिहगृह्यतेइतिस्थितेविधीयतेइतिविधि
रितिकर्मणिक्तिप्रत्ययःपूर्वस्येतिशेषेषष्ठी।अनुवादेपरिभाषानुपस्थानात्पुगागमेविधेः
केस्थानिवद्भावः।अचइत्यत्रतुआदेशाइतिसमभिव्याहाराद्योग्यतावलात्स्थानसंबंधलाभः।षष्ठीस्था
नेयोगेत्यतःपूर्वस्मात्रेनुवर्तितस्यस्थानेग्रहणस्येहाप्यनुवृत्तेर्वेतिप्रसिद्धःपंथाः।न्यासकारस्तुनिमि
त्तापेक्षमादेशापेक्षंवापूर्वत्वमित्यपिपक्षौभाष्येउपन्यस्तत्वात्स्वीचकार·वैयाकरणादेतुवहि
रंगयोरेचोरसिद्धत्वान्नदोषइत्याह।इदंचनाजानंतर्यइतिपरिभाषायाबहिरंगपरिभाषायाएव
वानित्यत्वेतिज्ञापकमुपष्टम्भसमर्थनीयं।अस्मिन्पक्षेविधिरितिभावेक्तिः।षष्ठीतुअनभिहितत्वात्के
मण्यपिसुस्थमेव।किंतुनिमित्तापेक्षतयापूर्वत्वेत्यदाघत्वस्यस्थानिवत्ताद्वाभ्यामित्यादौदीर्घोन
स्यात्।ईघतीतीत्वस्यस्थानिवत्वादिगंतलक्षणोगुणोनस्यात् देयमिति·तथागुणवृद्ध्योःस्थानि
वत्वाद्भवनंलावकइत्यत्रावादेशौनस्यातां।द्वयोरेकस्य·देयमणि·किरतौलवनेइत्यादिनिर्देशोपष्टंभेना
नित्यताश्रयणंतुक्लिष्टमितिदिक्।पूर्वत्वंचोभयथापिनगृह्यम्·किंतुव्यवहितसाधारणं।तस्मिन्नि

ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रस्तु

तिनिर्दिष्टइतिसूत्रेनिर्दिष्टग्रहणाल्लिङ्गात्। चङ्परनिर्ह्रासेनिषेधारंभाच्च। तेनपटयतिअवधी
दित्यादौस्थानिवद्भावःसिध्यति। वध्यादेशोप्यदंतः। स्यादेतत्। पटयतीत्यत्रांतर्वर्त्तिनींविभक्तिमाश्रि
त्यपदत्वाज्जश्त्वंप्राप्नोति। नचस्थानिवद्भावः। जश्त्वविधौनत्प्रतिषेधात्। सत्यं। कर्मसमर्पकात्प्रा
तिपदिकादेवणिजुत्पत्तिर्नतुसुबंतादितिवक्ष्यमाणत्वात्। सुबंतात्किजितिपक्षेपिइष्टवदित्यति
दिष्टयाभसंज्ञयापदसंज्ञायाबाधात्। पटुमित्यस्येवहिभसंज्ञाप्रवृत्तेतिकथंतर्हिपदसंज्ञाप्रवर्त्तेत। ञ५
तत्रचाप्रवृत्ताकथंतरामेकदेशविकृतेनन्यवत्। स्रग्विणमाचष्टेस्रजयतीत्यादौहिप्रातिपदिकाणि ज६
२१८ जुत्पत्तिरितिपक्षेप्येषैवगतिरितिवक्ष्यामः। अवधीत्तुदात्तलृणांतुभाष्यमते। अर्द्धधातुकीयाःसामा
न्येनभवंतीतिपूर्वसूत्रएवोपपादितत्वेनार्द्धधातुकोपदेशोयदकारांतंतस्यलोपइतिलोपसंभ
वात्। वार्त्तिकमतेतुलिङीतिपरसप्तमीयुक्तं। तयाचअत्रपदिसादावियअतोलोपोनप्राप्नो
ति। अतएवहलंतएवायमादेशइतिनन्मतं। वृद्धिस्तुनभवति। वध्यादेशेवृद्धितत्वप्रतिषेध
इतिपूर्वसूत्रस्थवार्त्तिकात्। एवंअखट्वकोवकुखट्वकइत्यादौकेणःआपोन्यतरस्यामितिहृस्व
स्यस्थानिवद्भावाद्ध्रस्वांतत्वात्पूर्वमितित्वकारकारस्योदात्तत्वोनभवति। किन्तुकपिपूर्वमि
त्युत्तरपदांतोदात्तत्वमेवभवति। अचिर्त्तिकः चकुचि तीकःइत्यादौतुचितःकपीतिदीर्घस्यस्था

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

8

श-कौ. निवद्भावाच्चिशब्देकारस्योदात्ततामवति। नचोभयत्रापि स्वरविधौ नस्यान्निषेधदिति निषेधःशंक्यः।
२९० लोपाजादेशमात्रविषयः स इति वक्ष्यमाणत्वात्। एवं पद्म्याम ध्येति वकुभिर्वृत्तिकारैरुदाहृतत्वान्मू
र्धाभिषिक्तमिति भाष्ये बहुतमप्युदाहरणं साध्येव। अकृतव्यूहन्यायेन प्रथमं पूर्वयणादेशा
योगात्। न चेयं कर्त्रीह अर्थे याष्टावुदात्तयणिति विभक्तेरुदात्तत्वं नस्यादिति वाच्यं। स्वरविधौ
२३५. व्यंजनस्याविद्यमानवद्भावेनैव यणमेवाश्रित्य तत्समाधानात्। न च पूर्वस्मादपि विधौ स्थानि
वद्भावाद्व्यंजनमेव नेति वाच्यं। रेफस्यादिष्टादचः पूर्वत्वात्। स्थानिद्वारकस्य पूर्वत्वस्यानित्यत्वा
त्। निष्ठायां सेटीति सेड्ग्रहणेन पूर्वस्माद्विधौ स्थानिवद्भावस्यानित्यत्वाच्च। तस्मान्मूर्धाभिषि
क्तमुदाहरणमिति पक्षो नातीव दुष्यति। अत एव हि आश्रीयमाणायामेव प्रकृतौ स्थानिवत्व
मिति पक्षे अकुर्वीशामलुन्याशां सत्यजग्ध्याशां राघ्याशामित्यत्र क्रमेण ये चेत्तु लोप ई हल्यघोरि
तीत्वये विभाषा राघोर् हलीत्यात्वं च प्राप्नोतीति भाष्य वार्त्तिकयोरुक्तं। यत्तु अंतरंगं वत्तवदिति वाऽ राम:१
सिद्धपरिभाषां वाश्रित्य पद्म्याम ध्येत्युदाहरणनिराकरणपरं भाष्यं। तत्तु अकृतव्यूहवच २९०
सोऽनित्यताभिप्रायेण कथं चिन्नेयमिति दिक्॥ ॥न पदांत द्विर्वचन वरे यलोप स्वर सवर्णा
नुस्वार दीर्घ जश्च र्विधिषु॥ ॥पदांतादि [redacted] पूर्वसूत्रेणाप्राप्तः स्थानिवद्भावो

पुधिधीयमानेषु१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नस्यात्।पदांतेकानिसंति·कौस्तः।इह यणावादेशयोः कर्त्तव्ययोः श्नसोरल्लोपो नस्थानिवत्।नचाना
दिष्टादचः पूर्वत्वविरहादेव नस्थानिवदितिवाच्यं।वाक्यादपोद्धृत्यपादानिसंस्क्रियंतेइतिपक्षेऽनादि
८२ ष्टा[illegible]चः पूर्वत्वस्यसत्वात्।नहिपदांतरनिरपेक्षमेव पदमिहशास्त्रेसंस्कार्यमितिनियमः।पुष्मपु
पपदे[illegible]संगतिप्रसंगात्।एतच्चागमसंज्ञासूत्रेकैयटेनध्वनितं।केवलपदसंस्कारपक्षेतुअदद्वी
चइत्यादौअचइत्यल्लोपोनस्थानिवदित्युदाहार्यं।विधिशब्दश्चेह नकर्मसाधनः।तथात्वेहिकर्मधा
रयोवास्याच्छेषषष्ठ्यंतेनसहतत्पुरुषोवा।नाद्यः।विधिशब्दस्यक्रियाशब्दपरतयापूर्वनिपातप्र
संगात्।नांत्यः।परांतस्यकस्मिंश्चित्कर्त्तव्येनस्थानिवदितिपर्यवसानेनवृक्षवृश्चइत्यत्रवलोपापत्तेः।द्वं
द्वनिर्दिष्टेषु द्विर्वचनादिष्वनन्वयापत्तेश्च।तस्माद्भावसाधनएव।अंतरंगत्वाच्च।अतएवकर्मषष्ठ्यंतेन
समासः।कुकीतटीत्यादौपदसंज्ञायांकर्त्तव्यायांयस्येतिलोपःस्थानिवदेव।नहिस्वादिष्वितिसूत्रेणपद
स्यांतोविधीतयेननिषेधः स्यात्।किंतुसंज्ञामात्रं।तत्रापियथोद्देशपक्षः।जश्त्वादिकार्यकालत्वपूर्वत्र
सिद्धेचेतिनिषेधा[illegible]पत्तेः।एकदेशविकृतस्यानन्यत्वाद्धतस्यानित्यत्वंरूःप्राप्तः।वहिरंगस्यासिद्धत्वान्ने
तिवक्ष्यते।भाष्येतुपदसंज्ञायाःपदांतत्वांस्वीकृत्यपदेअंतइतिभसंज्ञापिपदकार्यमितिचद्वधास
माहितं।तत्रांशेषाडिकेवचनसामर्थ्यादितिबोध्यं।वाचिकषडिकोनुपंचमेवक्ष्यते।द्विर्वचने।सुध्यु
पास्यः।स्थानिवद्भावनिषेधसामर्थ्यादेववहिरंगपरिभाषापीहनप्रवर्त्तते॥नाजानंतर्यइतिनि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श.कौ. षेधात्। वरे इति निपातनाद्वलुकं दृष्टम्। वरे योऽजादेशः स न स्थानिवत्। यायावरः। यातेर्नित्यं कौटि-
२११ ल्ये इति यङ्। यश्च यङः इति वरच्। तन्निमित्तकोऽतो लोपः स च आतो लोप इटि चेत्याल्लोपे कर्तव्ये न स्था-
निवत्। नन्विह परनिमित्तकत्वमेव नास्ति। आर्द्धधातुक इति विषयसप्तम्यभ्युपगमात्। अत एव हि अ-
चो यदिति अजग्रहणं कृतं। अन्यथा हलन्तात्ण्यतो विशेषविहितत्वात् परिशेषादच एव यद्भविष्यती-
ति किं तेन। विषयसप्तम्यां तु सत्यां दित्स्यं धित्स्यमित्यादावजन्तमेतत्परत्वादापयत् सिद्धये ऽजग्रहणमि-
ति यतो नाव इत्याद्युदात्तः सिध्यति। सत्यं। वरे ग्रहणेन परस्य समीपस्थोऽपि लक्ष्यते। तथा चानुदात्तेत-
श्च हलादेरिति सूत्रे आदिग्रहणं कृतं। हलन्तादित्येव तु पि इति। अस्ति च हलन्तादिति विशेषणस्य व्या-
वर्त्यम्। जुगुप्सनो मीमांसन इति। विषयसप्तमी लेत्विहापि अतो लोपे हलन्तत्वाद्घुञामाप्तमेवेति
हलेत विशेषणावैयर्थ्यात् सामर्थ्यादेवादिपरिग्रहसिद्धौ हलादि इत्येव ब्रूयात्। एवं च यातेर्यङन्तात्क्वि-
चि अतो लोपे यलोपविधिं प्रति स्थानिवत्त्वनिषेधाद्यलोपे च यायातीति स्थिते यङकारलोप-
स्य स्थानिवत्त्वादातो लोप इटि चेत्याकारलोपे पुनर्यलोपे यातिरिति भवति। न च पुनराकारय-
कारयोर्लोपे सति क्विब्लुप्तयमात्रं श्रूयेतेति वाच्यं। आल्लोपस्य स्थानिवत्त्वात्। चिलोलुङ्मा- राम:१
येनासिद्धत्वाच्च। यलोपे उदाहरणान्तरमपि। तद्यथा। कंड्यतेः क्विप् कंडूतिः। क्विन्निति तु काशि- २११
कायाः प्रमादः। अप्रत्ययादित्यनेन बाधात्। न च स्त्रियां क्तिन्नित्याद्यविवेक आबादित्वकल्पनं बहुलग्रहणं वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७ शोतन्नकरलो·यङ·न्ताक्किचिअल्लोपयलोपाल्लोपेषुपूर्वत्रासिद्धेचेतिस्थानिवत्त्वनिषेधात्शांषइतिषत्वेकृतेशाष्टिइतिसम्पद्यते ७॥

शरणीकरणार्हं। भाष्यकारेणैवकंडूयेत्येवंभवितव्यमितिवदताएतस्यापशब्दतोक्तेः। तस्माद्यंक्ति
जेव। ततोल्लोपयलोपौ। अल्लोपस्यस्थानिवत्वादुवङ्। ततभ्रूःऽरुद्रिस्रूः। नचकुष्यपिस्थानिवत्त्वं। आ
दिष्टादचःपूर्वत्वात्। अतएवकण्डूःपुनरुवङ्नभवति। सर्वेसर्वपदादेशादाक्षीपुत्रस्येत्याश्रित्यस्था
निद्धारकंपूर्वत्वं यद्यपीहवक्तुंशक्यते·भाष्यमतेलोलुवःपोपुवःइत्यादौयथा। तथापिस्थानि
द्धारकंपूर्वत्वंकाचित्कमेवेतिपूर्वसूत्रएवोक्तं। तथातिष्ठतेर्यङ·न्ताक्किबु। अल्लोपयलोपयोःस्तेष्ठीति
इतिस्थितेऽल्लोपस्यस्थानिवत्वादियङ्। यलोपः। तेष्ठितिः। तथापेपीयतेःक्किचिअल्लोपयलोपयोरे
५० रनेकाचइतियणिलोपेकृतेपेप्तिरितिभवति। एवंचेचीयतेश्चेक्किरितिदिक्। तदेवंवरेयलोपेऽपितन्ने
कंनिमित्तंकिंतुहद्इतिस्थितं। केचित्तुवरेईइतिईकारंप्रश्लिष्यईकारेपरतोविधौनस्थानिवदितिव्या
चख्युः। तेनामलक्याःफलंआमलकम्। नित्यंवृद्धशरादिभ्यइतिमयट्। फलेलुक्। ततोलुक्तद्धितलु
कीतिङीषोलुक्। सचयस्येतिलोपेनस्थानिवत्। पूर्वोक्तव्याख्यानेतुलुकालुप्तंनस्थानिवदितिवचनेनै
ष्यते। तत्रचलुप्तमितिनपुंसकेभावेक्तः। लुङ्नस्थानिवदितितुफलितोऽर्थः। ।स्वरे। चिकीर्षकःस
नोऽतोलोपोलितीतिककारेकारस्योदात्तत्वेकर्त्तव्येनस्थानिवत्। नचालितीत्यस्यारंभसामर्थ्यम्। कारक
इत्यादौसावकाशत्वात्। भाष्येतुआकर्षिकइत्युदाहृतंतदपानतः। छलोलित्वसामर्थ्यात्स्थानिवद्भावकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पि२

श०कौ० तव्यवधानेसत्यपिलित्स्वरस्यसुवचत्वात्।घ्नंतीत्यादोकुत्ववत्।सवर्णानुस्वारयोः।शि।णिढ।पि।णिढ।अ॰
२१२ सोरल्लोपोत्रनस्यानिवत्।अनुस्वारस्यानादिष्टात्वचःपूर्वत्वंतुस्थानिद्वारेत्युक्तं।यद्येसवर्णात्रहणमात्रे
णानुस्वारोप्याक्षेप्तुंशक्यतेतथापिविशेषापेक्षं ज्ञापकमित्यपिसंभाव्येत।तथाचयत्रनपरसवर्ण
प्रसंगः शिंषतिइत्यादौतत्रस्थानिवद्भावंनिषेद्धुमनुस्वारग्रहणं।अचःपरस्मिन्निति सूत्रेउक्तरीत्या
अभ्यासस्यासवर्णइत्यादिषुसवर्ण[illegible]तिनिषेधस्यलब्धावकाशतयाशिणिढइत्यादेरप्यसिद्धापत्ते
श्चेतिदिक्।।दीर्घेप्रतिषेधः।इहहलिचेतिदीर्घेऽल्लोपोनस्थानिवत्।यत्तुकाशिकायामुक्तंउपधायां
कर्तरि६ चेतिदीर्घइति।तन्नामादिकं।तथाचउपधायांचेत्यत्रोक्तं।प्रतिदीव्ने त्यत्रहलिचेतिदीर्घइति।यद्वा।
आचारक्विवंतात्क्विप्येतिक्विपिसमाधेयं।नन्वेवमनुनासिकस्यक्विरल्लोरितिदीर्घःस्यात्.सत्यं।अकृ
तव्यूहपरिभाषयाभाविनमल्लोपमालोच्यांतरंगोपिदीर्घोनक्रियते।जग्मुषइत्यत्रेडागमनका
रादेशविवेतिवोध्यं।ननुस्थानिव त्वाभावेप्यसिद्धंवहिरंगमंतरंगइत्यल्लोपस्यासिद्धत्वाद्दीर्घोनस्या
दितिचेन्न।कृतितुग्विधिग्रहणेनवहिरंगपरिभाषाया अनित्यत्वस्यज्ञापितत्वात्।पयोदेशपक्षेवा रामः
स्त्रीपरिभाषाप्रतिदीर्घस्यासिद्धतयांऽतरंगाभावेनपरिभाषायावाअप्रवृत्तेश्च।।जशिासज्विश्वमे। २१२
वध्वांतेहरी।तथाहि-अदनंग्धिःअदेःक्तिनिवकुलंक्षंद्सीतिघस्लादेशः।घसिभसोर्हलिचेत्युपधालोपः।

ध्यां१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

झलो झलीति सकारलोपः। घसिसकारे सिचो लोप इत्यस्य भाष्यकृतां नाश्रयणात्। वार्त्तिकमते तु छां
दसो वर्णलोपः। झषस्तथोर्धोऽध इति धत्वं। न चात्र स्मिन्कर्तव्ये पूर्वस्मादपीति स्थानिवद्भावः। पंचमी समासस्या
नित्यतायाः पूर्वसूत्र एवोपपादितत्वात्। घस्य झलां जशीति तल्लेकर्तव्ये उपधालोपो न स्थानिवत्। स
माना ग्धिः सग्धिः। सहस्य सः संज्ञायामिति सूत्रात्सह इत्यनुवर्तमाने समानस्य छंदस्यमूर्ध्वप्रभृत्युदर्केष्वि
ति सूत्रेण समानस्य सभावः। बब्धामिति भसेर्लोट्। तस्ताम्। शपः श्लुः। अंतरंगत्वाद्द्वित्वं। अभ्यासकार्यं। त
तो घसिभसोरित्युपधालोपादि प्राग्वत्। चरि। जक्षतुः। जक्षुः। घसेर्लिट्। अतुसुस्। च। गमहनेत्युपधा॰
लोपः। खरि चेति चर्त्वं। शित न स्थानिवत्। अत्र वार्त्तिकं। स्वरदीर्घयलोपाजादेशो न स्थानिवदिति। ते ७लोपेषु
नान्यः स्थानिवदेव। पंचभिः रलिभिः क्रीताः पंचारलयः। वेदे लुपं चारत्नयः। जसादिषु छंदसि वावचनं
प्राङ्णौ चङ्युपधाया इति गुणाभावे यणः। तस्य स्थानिवद्भावादिगंतकाले त्यादिना पूर्वपदप्रकृतिस्व
रः इत्याहुः। यद्यपि असिद्धं बहिरंगमित्यनेनापीदं सिध्यति तथापि अकृतव्यूहपरिभाषायामाश्रिस्तयोज्यं।
अचितीकोऽखट्वक इत्यत्र ह्रस्वांतेंत्यात्पूर्वमित्यस्य क्रमेण प्रवृत्त्यप्रवृत्ती फलमिति तु पूर्वसूत्र एवोक्तं। न
च तत्र बहिरंगपरिभाषायाः प्रसंगोऽस्ति। कि योः गिर्योः। कुत्पन्निपक्षे हलि चेति दीर्घः प्राप्तः। यणः स्थानि
वद्भावान्न भवति। अचश्चूरित्यधिकारे भुजेः किंच। कृग्रहद्रुहकुटिभिदिच्छिदिभ्यश्चेति डुः स च कित्। यत्तु
हरदत्तेनन्यासकृता च कृञ्योरिष्वेत्युपन्यस्तं। तत्केचिद्गुणादिहेतुषु अन्वेषणीयं। वाय्वोः इह यलोपो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४। लवमाचक्षाणो लौः अन्त। णिचि यष्टि लोपो यश्च क्नोणि लोपस्तदुपं क्लोः यङिति यकारस्य किनिमित्ते कुठि कर्तव्ये न स्थानिवत् ४

शा·कौ० ।अस्मिंश्च वार्त्तिके स्वरग्रहणमात्रमावश्यकम्। कियोर्गियोरि [redacted] तितु उपधायां चेति सूत्रे वृत्तिका

२९३ रोक्तरीत्या उणादीनामव्युत्पत्तिपक्षावलंबनेनापि सिद्धं। वाय्वोरितितु वहिरंगस्यासिद्धतया सिद्धं। किं

तु गुपधालचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं। पूर्वत्रासिद्धे च न स्थानिवदिति स्वरदोषः संयोगादिलोपलत्वणत्वेषु।

अस्यार्थः। क्वौ विधिं प्रति न स्थानिवत्। एत्येधत्यूठ्स्विति वृद्धिः। तथापि पिपठिषि ग्रहणाकुलानीति दीर्घो

वेवीटामिति सूत्रे यदुदाहृतं तदपि क्वौ विधिं प्रतीति व्याख्याने एव संगच्छते। क्वौ लुप्तं न स्थानिवदिति व्याख्या

ने तु लोः पिपठिषी त्युभयमपि न सिध्येत्। णिचि टिलोपस्य स्थानिवद्भावेन ऊठोऽसंभवात्। पिपठिषतेरप्र

त्यये अतो लोपे नपुंसकबहुवचने शौ रलक्षणे नुमि कर्तव्ये ऽतो लोपस्य स्थानिवत्त्वनिषेधेन नुम्प्रसंगा

च्च। एतच्च दीधीवेवीटामिति सूत्रे कैयटादि सूत्रे च मिथ्याग्रन्थे स्फुटं। कैयटोपि दीधीवेवीटामित्यत्र क्वौ विधिं प्र

तीत्यर्थो व्यवस्थितो न तु क्वौ लुप्तं न स्थानिवदितीत्याह। अत्रेयं व्यवस्थितइति वदता क्वौ लुप्तं न स्थानिवदिति

पक्षोपि कैश्चिदाश्रीयते एव नियमः परं नास्तीति सूचितं। लुप्तमिति नपुंसके भावे क्तः। एवं च सरवुर्गोमान्प

दः त्वमहमिति सिद्धम्। तथाहि। ख्यत्यात्परस्येति सूत्रे भाष्यम्। सखीयतेः सखुः लूनीयतेर्लूनयुरिति। तत्र स

खीयतेः क्विपि अल्लोपे यलोपे ऽल्लोपस्य स्थानिवद्भावात्परत्वात्किलोपं वाधित्वाद् कोयणचीति यण्स्यात्। ततो रामः१

यलोपे सखोल्तनइति स्यात्। अतएव तत्र क्वौ लुप्तं न स्थानिवदिति यणां परिजहार कैयटः। तथा उगिदचामि २९३

ति सूत्रे अधातु भूतपूर्वस्यापि नुमर्थमधातुग्रहणमिस्युक्त्वा गोमत्यतेरप्रत्यये गोमानित्युदाहृतं भाष्ये। त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्राप्यलोपस्य स्थानिवत्त्वात्सर्वनामस्थानपरत्वं नास्तीति नुम्न स्यात्। न चाधातुग्रहणसामर्थ्यात्स्थानिव
द्भावकृतव्यवाये सत्यपि नुम् स्यादिति वाच्यं। आचारक्विबन्तात्क्विबेति क्विपि चरितार्थत्वात्। तस्मात्क्वौ लुप्तं
नेत्येव शरणम्। ननु गामत्यते गौर्मतते वीउभयथापि गोमानिति न सिद्ध्यति। अत्र संतस्येति दीर्घविधा
व[redacted] धातोरिति विशेषणात्। सत्यं। तत्र धातुग्रहणमसंतस्यैव विशेषणं न तु अत्वंतस्यापीति वक्ष्यमाणत्वा
धि५ न्न दोषः। तथा येन विंस्तदंतस्येति सूत्रे केवलोपि पाच्छ्द्रोस्ति पादयतेः पात् पद इति भाष्यं। अत्रापि
स्थानिवद्भावाद्व्यवधानेन पद्भावो न स्यात्। क्वौ लुप्तं नेति सिध्यति। अत एव पादस्य पादहस्त्यादिभ्य इति न
सूत्रितं। प्रतिपदोक्तस्यास्यैव पदादेशो मा भूत्। किं तु क्विवंतस्यापि यथा स्यात् इति। एवं च पादस्य लोप
इति गुरुनिर्देशं कुर्वता सूत्रकृता एव क्वौ लुप्तं न स्थानिवदिति ज्ञापितं। तच्चाकाचित्कमिति तु प्रकृतसूत्र
स्यस्यानेवं विज्ञायते क्वौ लुप्तं नेति भाष्यस्यार्थः। विशब्दमाख्यात्स्यत्यात्सूत्रादि भाष्याच्चेति व्यवस्थि
तश्च वर्णमयुं जानेन कैयटेन ध्वनितं। तथा युष्मानाचष्टे युष्मयति। ततः क्विपि णिलोपे सोत्वाहो सावि
ति कर्त्तव्ये णिलोपो न स्थानिवत्। तदुक्तम्। स्थानिवत्त्वे च लोरत्र क्वौ लुप्तत्वान्न विद्यते इति। स्थानिव
त्वमिति। लोपस्येति शेषः। णेः क्वौ लुप्तत्वादित्यन्वयः। अस्तु तर्हि क्वौ लुप्तमित्यमेव। तावतापि लवमाचेस्ता सपानि२
णलोरित्यस्यासिद्धेरिति [redacted] चेन्न। पिपठिषीत्यस्यासिद्धिप्रसंगात्। देवयतेर्द्यूरित्यत्र तु इह कैयटेन यदुदाह
तं क्वौ लुप्तं नेति सिध्यतीति। तस्यायमाशयः। यद्यपीह क्वौ विधिं प्रति इत्यसिद्धस्तथापि तस्य स्थानिक्षाराश

(अन्यथा नैश्यपते इत्येव वदेदिति भावः)

थ

नादिष्टादचः पूर्वत्वेन णिलोपस्य स्थानिवद्भावादचो ञ्णितीति वृद्धिप्रसंगः। तस्मात्कौलु संने त्येव शरणमि
शा·त्त्वो· ति। यत्तु लोपो व्योरिति सूत्रे कंडूयतेः क्यजंताद्प्रत्यये कंडूः कंडुवाविति व्युत्पादयन्कैय[illegible]टआह· स्थानिव
२९४ द्भावाघण। तस्य कुरुटू· न चकुडिकर्तव्ये स्थानिवत्वेन प्रतिबंधः स्यादिति वाच्यं। वकारस्य आदिष्टादचः पूर्व
त्वादिति। तत्तु स्थानिद्वारकं पूर्वत्वमनित्यमित्याश्रित्य। तदीत्या तु दधूरिति सुसाधमेव। ननूभयथापि
दधूरित्यत्र प्रत्ययलक्षणेन वृद्धिः स्यादेवेति चेन्न। वहिरंगस्य कुतो वृद्धिं प्रत्यसिद्धत्वात्। एवं च स्थानिवद्भावे
सत्यपि न काचित्क्षतिः। वहिरंगत्वेनैव सर्वसमाधानात्। तस्माद्दधूरिति पक्षद्वयेपि सिध्यतीत्येव तत्वं। नन्वे
कदेशविकृतस्यानन्यत्वाद्दिव औत्स्यादिति चेन्न। निरनुबंधकपरिभाषयाऽधातुग्रहणानुवृत्तेर्वा अक्षधू
रित्यत्र न औदिति दिव औत्सूत्रे भाष्य एव स्पष्टत्वात्। यद्यपि ङ्गिदचामिति सूत्रेऽधातुभूतपूर्वोदिस्पर्धस्तथा र्थस्य
पीह शब्दाधिकार इति भावः। एतेन हलि चेति दीर्घः· दीव्यतीति नामधातुप्रकरणे कौमुदीग्रन्थो प्रत्युक्तो
। दिवेर्डिविरिति न्यासो हितसूत्रेण डिविरिति वदन्मधवोपि दिव्यतीति ह्रस्वमेवोपजगाम। प्रकृतमनुस
रामः। द्विर्वचनादौ तु ओः सुपीति यण्। दध्वौ· दध्वः। इत्यादि खलपूवत्। कंडूः कंडुवौ कंडुव इति तु उवङेव
। संयोगपूर्वकत्वात् यणोऽप्राप्तेरिति दिक्। अत्रायं संग्रहः। सख्युणी मान्यदत्वं च कौ लुप्तस्थानिदर्शनं। अ रामः
नित्यत्वेपि पाठविधौ विधौ लौ द्वयो दधूः। । लुक् न स्थानिवत्। आमलक्या फलमामलकं· फले लुकः प्र
२९४ त्याख्यानपक्षे तु पंचभिः पट्टीभिः क्रीतः पंचपटुरित्युदाहार्यम्। तथा पंचेंद्राण्यो देवता अ

फाल्गुनं २

सर३

सपंचेंद्रःपंचाग्निः॰ङीषासंनियुक्त आनुक्‌ऐकारश्चश्रूयेत। न च संनियोगशिष्टन्यायेन निवृत्तिः परत
च्छितत्वं तु ङि॰मिनायां ङीषूनिवृत्तेः पूर्वयोरानुगैकारयोर्निवृत्तौ क [redacted] र्तव्यायामचः परस्मिन्निति स्थानिव
त्वात्। येन तु पूर्वोक्तरीत्या वरईइतीकारप्रश्लेषं कुर्वंति तेषामिह लुग्ग्रहणं न कार्यं। उपधात्वे कर्त्तव्ये न स्था
निवत्। तेन परिखाशब्दाच्चातुरर्थिकेऽणि कृते वृद्धादके कांतखोपधादिति परिखशब्दात्वोपधलक्षणेछ
प्रत्यये पारिखीयः सिध्यति। अन्यथा उपधासंज्ञायाः पूर्वविधित्वेन तत्र कर्तव्यायामाल्लोपः स्थानिवत्स्यात्
नन्वेवं पटयतीत्यादौ वृद्धिः स्यादिति चेन्न। यत्रोपधासंज्ञामुपजीव्य प्रत्ययो विधित्सितस्तत्रैवायं निषेध इति
भाष्ये स्थितत्वात्। अत्र च चङ्परनिर्ह्रासग्रहणमेव ज्ञापकं। कथं तर्हि भाष्ये यलोपे सौरीवलाकेत्युदाहरणं द
त्ताउपधाविधौ नेत्येव सिद्धमित्युक्तमिति चेत्॰ अनास्थावादमात्रं तदित्यवेहि। तत्रा हि ते नेकदिग्गिसलतान्ङी
प्यल्लोपद्वयस्यापि यलोपे कर्तव्ये स्थानिवद्भावे निषिद्धे समानाश्रयस्याल्लोपस्याभीयत्वेनासिद्धतायां
नी॰१० यलोपः सिध्यतीति यलोपे न स्थानिवदिति अस्यैव सौरीत्युदाहरणं॰ उपधात्वं हि तत्र लोपे उपयोगि न तु
प्रत्ययविधाविति स्थितं। चङ्परे णौ यो ह्रस्वः स चङ्परनिर्ह्रासः तत्र न स्थानिवत्। वादितवंतं प्रयो
जितवान् अवीवदद्वीणां परिवादकेन। अपपमल्लिचौ लोपस्य स्थानिवत्त्वादनुपधा आकार इति णौ च
ङीत्युपधाह्रस्वो न प्राप्नोति। णि स्मान्नास्य ग्रहणं द्व्येतत्सिद्धं। इदं तूदाहरणं॰ वादि स्मिन्नारम्भात्॰ अ
वीवदत्। नवनाग्लोपीति निषेधः सेव्यः। परत्वाद्वृद्धौ सत्यां टिलोपइत्यभ्युपगमे नाग्लोपित्वाभावात्।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रिचू: २

अत एव हल्लकलेन्तदं तनिपातनं सार्थकं। कुत्वेन स्थानिवत्। अर्चयते रेलादिकः कप्रत्ययः। अर्कः।
पाचयतेः पाक्तिः। चो: कुरिति कुत्वे णिलोपो न स्थानिवत्। इहसूत्रे तु श्चर्षुइत्येव सिद्धे विधिग्र
हणं द्वाश्रयेण विधानंतरोपसंग्रहार्थम्। तद्युतादनार्थं [illegible] च किंतु गित्वादि वार्त्तिकमितिति
क्वर्थः। तत्रापि क्कि चङ्परनिर्ह्रासोपधानां ग्रहणमावश्यकं। नु कई कार प्रश्लेषेण
गतार्थत्वात् कुत्वस्य पूर्वत्रासिद्धीयत्वाच्चेत्यवधेयं। चजोरिति कुत्वे वा उदाहरणमन्वेष
णीयं। पूर्वत्रासिद्धे च न स्थानिवत्. पा. प. अते: क्रिचू. पापक्तिः। यायज्यतेर्याय ष्टिः पा
चयतेः पाक्तिः। याजयतेर्याष्टिः। इहालोपणिलोपौ कुत्वषत्वयोर्न स्थानिवत्। एवं लेह
यतेर्लेढिः वेषयतेर्वेष्टिः दाशयतेर्दाष्टिरित्यादयुह्यम्। न्यायसिद्धं चेदं. अचः परस्मि
न्नित्यतिदेशं प्रति त्रिपादीस्थस्यासिद्धत्वात् तस्मिन् कर्त्तव्येऽतिदेशाप्राप्तेः। न चैवं स्थानि
वत्सूत्रेस्याप्रवृत्तौ रामइति विसर्गो न स्यात् तद्धनिवार्यं। प्रत्ययः परश्चेत्यादिनिर्देशोऽभौभ
गोइति सूत्रेऽश्य्युग्रहणेन च न तत्प्रवृत्तेर्ज्ञापितत्वादित्यवधेयं। एवं स्थिते दिर्घ चसवर्णानुस्वा
रदीर्घजश्वरः सूत्रे न पाद्याः। किंतु नपदांतवरेयलोपस्वरेष्विवत्येव पाद्यमिति भाष्यवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्त्तिकयोः स्थितं। स्यादेतत्। यदि दीर्घग्रहणं न क्रियते तर्हि वाक्ये दीर्घविधौ स्थानिवद्भावः प्रसज्येत. तथा च चिक्ल
मुलोरिति सूत्रे यङन्तात् स्विजंताद्वा णिचि ततश्चि णिश्चंश्यामि अथ्यामीति यदुदाहृत्य तेतन्न सिद्ध्येत्। न च दी
र्घग्रहणसामर्थ्यात् स्थानिवद्भावबाधः। कमेर्णिङ् सूत्रे हरदत्ता चुकरीत्या चिसमुलोर्दीर्घ इत्यत्र कैयटेनोक्त
रीत्या चाहीडीत्येतत्सिद्ध्या हेडीत्यस्य निरस्तातस्य चरितार्थत्वात्। उच्यते। लित्वजात्येकं ग्रहीतावतामीति सिद्धं।
५१ं अध्यामीति तु यङ्लुगंतात् णिचि भविष्यति। न हि यङ्लुकोः स्वरेऽपि वाक्यश्चिद्दिरोर्यतिर्येनयन्नेव सावधियितुं लि
ख्यत। एवं च श्राहितमित्याद्यपि सिद्धं। पूर्वस्मादपि विधौ स्थानिवद्भावेन णिचामय्यवधाने सति ग्रहो लिटीति दीर्घ
७६ स्याप्रवृत्तेः। सूत्रमते तु विहितविशेषणाश्रयणाद्ग्राहितमित्यादौ न दीर्घः। अत एव यङन्तान्त्र चिजरीगृहीते त्यत्र न
दीर्घः। स्थानिवद्भावात्सूत्रमते विहितविशेषणाश्रयणाच्चेति स्थितं। यङ्लुगंतात्तु जरीगृहीते दीर्घो भवत्येवेति मा
धवः। द्विः प्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तात् ग्रहेर्विहितत्वात्। तथापात्। यङ्लुको ऽनैमित्तिकतया ऽकृत्लादेशतया गुरु
च लुका लुप्तत्वाच्च स्थानिवद्भावोपि नास्तीति माधवस्याशयः। वस्तुतस्तु यङ्लुक्यपि इड्यो दीर्घोऽनिष्ट एव। एका
चो द्वे प्रथमस्येति सूत्रे भाष्यकैयटादिपर्यालोचनया तथैव निर्णयात्। तथा च तत्र ग्रहेरङ्गादिति भाष्यमुपादाय
कैयट आह. न चौहि जरीगृहीतं गंतुः ग्रहेः विशेषणसामर्थ्याद्विप्रयोगाश्रयणमिति। यद्यपि तत्र यङन्त
प्रक्रमेदमुक्तं तथापि युक्तिसाम्याद्यङ्लुगन्तेऽपि न दीर्घ इति लक्ष्यते। अत एवैकाचो द्वे इति सूत्रे हरदत्तोऽपि दीर्घमाशं
क्याह। एकाच उपदेशाद्ग्रहणतो दीर्घविधावेकाच्ग्रहणमनुवर्त्तत इति. न ह्यत्र पक्षे यङ्लुकि दीर्घस्योक्तिसंभवो
प्यस्ति। नन्वेवं ग्रहो लिटीति सूत्रे यङ्लोपे यो के मितिवार्त्तिकव्याख्यावसरे स्थानिवद्भावाद्विहितविशेषणाश्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धा. रू. णाद्दीर्घपरिहारन्कैयटो विरुध्यते। यङ्लुगर्थमप्याश्रुतरूपाश्रयणस्य एकाज्ग्रहणानुवर्त्तनस्य वावश्यकतयातेनैव
२१६ गतार्थत्वादितिचेन्न। यहे लिटीत्यत्र लकैयट ग्रंथस्यौपायां तर[illegible]हूषकत्वादिति न्यायेन यङ् भेउपायोंतराभिधानपरत्वा
त्। अतएव तत्र कैयट आ ग्अन्यत्रास्य दोषस्य सम्यगुद्धतत्वादिति। एवं हि वदंस्तत्र त्यपरिहारस्याव्यापकतामेकाच्सू
त्रोक्तस्यैवावश्यादर्त्तव्यतां चाभिप्रैति। न च यथाश्रुतरूपपक्षे गृहीतमित्याघसिद्धिः। अंगसंज्ञाप्रवृत्तिवेलायां यथाश्रु
तस्यैव तत्र सत्वात्। ग्राहितादोलुनेव। एकाच इति समाधानं तुणिज्भिन्नविषयकमेव। तस्मात् यङ्लुगंतात्सिजंताच्च
यङंताच्च यहेरिट्ः। द्विधात्रिधा चतुर्धा च दीर्घो नेति व्यवस्थितं। । माधवग्रंथस्तु विहितविशेषण पक्षस्य मुख्यतां पक्षां
तरेणाभ्युच्चयतां च परिकल्प्य कथंचिन्नेय इति प्रतिभातीतिदिक्। तस्य दोषइत्यादेरयमर्थः। तस्य पूर्वत्रासिद्धे चेत्यस्य
स्थलत्रये दोषः। अतिप्र[illegible]सक्तिः तस्मात्तत्र स्थानिवद्भावस्य प्रतिप्रसवः कर्त्तव्य इत्यर्थः। ते[illegible]नकाक्यर्थवाक्यर्थे इत्यत्र
[illegible] स्कोरिति लोपोन। निगार्यते निगाल्यते ऽचि विभाषेति लत्वंसिध्यति तथा माषव
पनीत्यत्र णत्वं न भवति। अल्लोपस्य स्थानिवत्वेन नकारस्य समासांतत्वाभावात्। न चासत्यपि स्थानिवद्भावे ङीवेव समा
सांतो नतु न कार इति वाच्यं। ङीवुत्पत्तेः प्रागेव समास इति द्वितीये वक्ष्यमाणत्वात्। एवं स्थिते तक्षयतेः क्विपि तकरक्ष
यतेस्तकरगित्यादि बोध्यं। अत्राहि संयोगादिलोपे कर्त्तव्ये णिलोपस्य स्थानिवद्भावान्न तत्प्रवृत्तिः संयोगांतलोपे तु स्था
गो निवद्भाव निषेधाद्भवत्येवासो। रङितितुमुद्वात्किपि बोध्यं। यत्तु अचः परस्मिन्निति सूत्रे एअत्रेति भाष्यमुपादाय कैय रामः १
टेनोक्तं। पूर्वत्रासिद्धे चेत्येतदत्र नास्ति तस्य दोषइत्यत्र संयोगादिलोपस्य संयोगोपलक्षितलोपोपलक्षणत्वादिति।
तन्न वास्तवं किंतु तत्र स्य पूर्वपक्षिणोभिप्रायवर्णनमात्रं। अतएव न पदांतेति सूत्रशेषे तेनैवोक्तं। स्कंदयतेः स्कन्‌ २१६
तक्षयतेस्तगिति। यत्तु सिद्धकांडे भ्रुत्वं धुत्वे इति वार्त्तिकव्याख्याव[illegible]सरे कैयटेनोक्तं मधुगितीष्यते मधुङिति प्राप्नोति।

(मधुभ्रुच्छब्दस्य त्यर्थ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्तुसकारोपदेशसामर्थ्यादिति वोध्यं। स नु श्चोततीत्यत्र शितुगित्यस्याप्रवृत्त्यासकारश्चरितार्थ इति चेत्तर्हि श्चोनु त्तमि
तिसमाधेयं। कुस्मनाम्नो वेत्यत्र रूपिति माधवोदाहृतं सम्यगेव। तत्र सामर्थ्यविरहेण संयोगादिलोपाप्रवृत्तेरिति दिक्। स्या
देतत्। इह संयोगादिग्रहणं मास्तु न चैवं काक्यर्थमित्यादौ स्कोरिति लोपापत्तिः। स्कोः संयोगे त्यत्र हलो हलि इत्यतो हल इ
त्यनुवर्त्तते तच्चोपसर्जनस्यापि विशेषणं तत्तु प्र धा नयोरपि स्कोः अयमिति चायात्। ततश्च हलंतो यः संयोगस्तदाद्यो
:स्कोर्लोपः स्यादिति सूत्रार्थात्। वहिरंगतया यणो सिद्धत्वाच्च। अत एव वक्ष्यत्रे त्यादौ संयोगान्तलोपो नैवर्त्तते तथा चाष्ट
मेवार्त्तिकं नयाहलो लोपाद्बहिरंगलक्षणत्वादिति। न चैवमपि काष्ठतक्षाष्ठरगित्यादि न सिध्येदेवेति वाच्यं। अनभिधा ग ५
नान्तत्र क्विप एव दुर्लभत्वात्। अनभिधानं च काष्ठशगेव नास्तीत्याष्टकभाष्यवलेन न्यायसाम्याल्लिर्णीयत इति।
अत्रोच्यते। कुस्मयतेः कूरित्यादिसिद्धये संयोगादीति वाच्यमेव। किंच तक्षरगित्याद्यर्थमपि वक्तव्यं। न चानभिधानं।
प्रमाणाभावात्। केयटादिभिरुदाहृतत्वाच्च। न च काष्ठशगेव नास्तीति भाष्यं तत्र प्रमाणं। न्यायवैषम्यात्। तथाहि।
काष्ठशक् स्यादित्यत्र हल्परो यः संयोगस्तदादेः ककारस्य लोपमाशंक्य तदुक्तं तेन यत्र कलोपप्रसक्तिस्तदभिप्राय
कमनभिधानं। अत एव वकांतेभ्यः क्विम्नेत्येवंपरतया तद्व्याख्यातं। न च णिजंतेभ्यः क्विपि कलोपप्रसक्तिरस्तीति स्थानि
वद्भावात्। न च पूर्वत्रासिद्धे चेति निषेधः संयोगादिलोपे प्रत्यसवस्य जागरूकत्वात्तस्मात्संयोगादिलोपग्रह
णं कर्त्तव्यमेवेति स्थितम्। इदं त्ववधेयं। संयोगान्तस्य लोप इत्यत्र न याहलो लोपाद्बहिरंगलक्षणत्वाद्वेति द्विधा
सिद्धान्तव्यवस्थापनात् रूपिति संयोगान्तलोपोपि दुर्लभः। तेन कुस्म इत्येव भवति प्रथमपक्षे। द्वितीयपक्षाभिप्राय
णतु साधवः। नन्वेवमपि जत्वग्रहणं व्यर्थं। निगाल्यते इत्यत्र सत्यपि णिलोपे प्रत्ययलक्षणेन लत्वसिद्धेः। न च वर्णाश्र
यत्वम्। धातोः स्वरूपेन प्रत्यये कार्यविज्ञानात्। इदं च दाडिमाय नादिसूत्रे ध्वोणहस्येत्यत निपातनेन ज्ञापयिष्यते। कि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा.द. चांतरंगत्वादपि लत्वं सुवचमिति। अत्रोच्यते। तणह इमित्यत्राचिनेत्यनुवर्त्तते हलीति निवृत्तं। तथा चात्रणोः डित्ला
दिसिद्धये प्रत्ययलक्षणं नारंभणीयं किंतु नियमार्थं तदीरं भइति भाष्ये स्थितं। एवं च इतरव्यावृत्तिमात्रफल
२१७ कं प्रत्ययलक्षणसूत्रं तत्तत्कार्याणि तु स्थानिवत्सूत्रेणैव निर्वाह्याणि। तत्र च प्रदीव्यतीणिवृत्तये ऽज्ञाधात्रे
नाप्यलोन्त्यपणेनिषेधः स्थितस्तथा चाचिप्रत्ययेविधीयमानं लत्वं स्थानिवद्भावं विना दुर्लभं। यदप्यंतरंग
त्वाल्लत्वमित्युक्तं। तदपि न। अकृतव्यूहपरिभाषया लत्वाप्राप्तेः। किंचोपसर्गस्यायतावितिसूत्रेपक्षद्वयंव
क्ष्यते। अयति परत्वमुपसर्गस्य विशेषणं रेफस्य वेति। तत्राद्यपक्षे पल्ययते इति सिध्यति। प्लायत इ
ति तु न सिध्येत्। एकादेशे कृते ऽपवर्गाभावात्। उभयत आश्रयणे नादिवद्भावायोगाच्च। तस्मात्तत्रस्था
निवद्भावेनैवमपवर्गो वक्तव्यः सच एवं त्रासिद्धे चेति निषिद्धः इति लत्वे प्रतिप्रसवः सार्थक एव। द्वितीय
पक्षे तु पल्ययत इति तस्मात्। यकारेणव्यवधानात्। प्लायत इत्यत्रैव परं लत्वं स्यात्। पूर्वत्रासिद्धे चेति स्था
निवत्त्वनिषेधेन तत्र रेफस्याय ति परत्वाविघातात्। कृतेपि हलत्वग्रहणे येन नाव्यवधानं तस्मा येन पल्यय
त इत्यत्रापि लत्वं सिध्यति। स्फुटं चेदमस्मिन्भाष्य एव। तस्मादिहलत्वग्रहणं कर्तव्यमेवेति स्थितं। लत्वग्रह
णं तु व्यर्थं। तथा हि। माषवपनीति ताव द्बहिरंगपरिभाषया पि सिद्धं। न च प्रहिणोतिप्रमीणीतइत्या
दिसिद्धये तदिति वाच्यं। अचः परस्मिन्निति सूत्रस्य प्रवृत्तिं विना प्येकदेशविकृतस्यानन्यतया हिनुमी राम:
नेत्यस्य प्रवृत्तिसंभवात्। न च धातोरादिति सूत्रे वर्णितरीत्या प्रियापूर्व इत्यादिसिद्धये णत्वग्रहणमिति २१७
वाच्यं। कार्यकालपक्षे बहिरंगपरिभाषयैव तस्यापि सिद्धेः। यथोद्देशपक्षस्तु न गृह्यते भत्वात्स्वे येन

णत्वे सह फलसाम्यार्थं । एतेन प्रियाष्ट इति णत्वाभ्युपगमपरः पदमञ्जरीग्रंथोप्युक्तः । बहिरंगपरिभाषाया अभि
त्यत्वेपीह तदप्रवृत्तौ प्रमाणाभावात् स्मादिह णत्वग्रहणं व्यर्थेति स्थितं । प्रत्युत णत्वे स्थानिवत्वाभ्युपगमे बाधकम
प्यस्ति । तथाहि । अनितेरंत इति सूत्रेन्त इति योगं विभज्य हे प्राणिति रूपसिद्धये पदांतस्येति प्रतिषेधं बाधयितुं अंत
इति सूत्रेण पदांतस्यानितेर्णत्वं विधीयत इत्येका व्याख्या । अंतशब्दः समीपपर्यायमाश्रित्य निमित्तसमीपस्थायो
नितेर्नकारस्तस्य णत्वं निमित्तसमीपस्थस्यानितेर्यो नकारस्तस्य णत्वमिति च योगविभागं विनापि व्याख्यानद्व
यं भाष्ये स्थितं । तत्र प्रथमे पक्षे प्राणिनिद्[redacted]त्यादावेके नाकारेण व्यवधानेपि प्रवर्तमानसामर्थ्याण्णत्वं प्रवर्त्तते । द्वि
तीयपक्षे त्वेकादेशस्यादिवद्भावात् इकारादप्यवहितत्स्यानितेस्तद्भवात्स्य[redacted]वर्त्तते । प्राण्यंनिंसत्रतुवर्णद्वयेनैकेन वा तीा
व्यवा[redacted]यात्पक्षद्वये पि णत्वं न प्रवर्त्तत इति स्थितमप्रमे । यदि चेह णत्वग्रहणं क्रियेत तर्हि पर्यणिती[redacted]तिव
त्प्राणितीत्यत्रापि द्वये नैकेन वा वर्णेन यथासंभवं व्यवधानात् णत्वं न स्यात् । नचवचनसामर्थ्यात् स्यानिवद्भाव
कृतं व्यवधानमाश्रयिष्यते वृत्रघ्न इति कृत्वइवेति वाच्यं । निरणिति दुरणिति ीत्यत्रैचरितार्थत्वात् । नचैवं निर्दुरोरनि
तेरित्येव ब्रूयात् तन्नत्व नितेरंत इति सामान्यसूत्रं प्रणायेत इति वाच्यं । आवृत्तिमाश्रित्य हे प्राणिति णत्वस्य प्रतिप्रसवा
र्थं निर्दुरोरित्यपेक्षणात् इत्युक्तावक्षर[redacted]लाघवानुरोधाच्च सामान्यलक्षणप्रणयनसंभवात् । तस्मादाङ्नि
पं५ कभाष्यपर्यालो[redacted]चनेनेह णत्वग्रहणं न कर्तव्यमिति तिनिर्णीते । अत एव व्यूढोरस्केनेत्यत्र णत्वं न । अन्यथा विसर्गस्था र्प५
ट्त्वेन तदादेशस्य सस्य स्थानिवद्भावासत्वं स्यात् । इह णत्वग्रहणस्य प्रयोजनाभावस्तु कृत एव । ततश्च तस्य दोषः सं
योगादिलोपलत्वणत्वेष्वेव वाच्यं । वस्तुतस्तु तदपि न वाच्यं । पूर्वत्रासिद्धे चेति हि असिद्धत्वादेव न्यायसिद्धमित्युक्तं ।
तें२ तच्चासिद्धमनित्यं । अभुनोतिवदमुनेति वाच्ये नमुनद्दत्युक्ते नेति योग[redacted]विभागात् । नुटीति वाच्ये नामीति लिं
गाच्च । अनश्च इत्यादेरंगस्येत्यनेन व्यावृत्तौ सिद्धायामपि अक्षं एवं तद् इत्वादो नामीति दीर्घवा[redacted]रयितुं हि नामीत्युक्तं ।

(अक्षिशब्दान्मतुपि तस्मिंश्छांदसत्वाद नङ् नलोपे नो नुडिति नुट् ।)

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रा.म. २१८ रुधादिभ्यःश्नम्‌श्ना न लोप इति सूत्रद्वये भाष्यकैयटाद्यालोचनेनारंभसामर्थ्यात्संनिपातपरिभाषाया इवासिद्धता
याश्चाप्यविशेषबाधे प्राप्ते नामीत्युक्तिरिति चेन्न. कृति तुग्ग्रहणादिना संनिपातपरिभाषाया अनित्यत्वज्ञापनात्.
सामर्थ्याद्बाध इति पक्षे व्यक्त एवं तत्स्यादादावुभयबाधे गौरवाच्च. तस्मादनित्यताज्ञापनार्थमेवैतत्. तेन सिद्धकांड
मपि संगृहीतं भवति. एतेन रामः रामेभ्य इत्यादौ रुत्वस्यासिद्धत्वाद्रोरुकारस्य संज्ञालोपौ कथं स्यातामिति एतद
पि समाहितं । अत्रयः परश्चेत्संधिनिर्देशाच्च. यत्वनुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौ अप्रत्ययसिद्धत्वं नेति चे
न्न । तरुमूलमित्यादौ हशि चेत्यस्य व्यावृत्तये ऽतो रोरित्यत्र सानुनासिकस्यैव निर्देशाभ्युपगमेन चारितार्थ्यात् । रा
म इत्यादावपि सानुनासिकश्रवणापत्त्या बाधमानतया चारितार्थ्यस्य स्पष्टत्वाच्चेतिदिक् ॥ तेन संयोगादिलोपल
त्व योरसिद्धताविरहात्स्थानिवत्त्वं भाविष्यतीति सकलेष्टसिद्धिः । ।द्विर्वचनेऽचि। ।रूपातिदेशोयं । द्वि
त्वनिमित्ते अचि यो ऽजादेशः स स्थानिवद्रूपं लभते द्वित्वे कर्तव्ये । चक्रतुः. चक्रुः. द्वित्वनिमित्तत्वेनाज्विशेषणा
दिह न । दुद्यूषति. सुस्यूषति । न ह्यूट् द्वित्वनिमित्तं । नन्वेवं चक्रतुरित्यत्रापि स्थानिवद्भावो न स्यात्. अतुसादि
त्वनिमित्तत्वेप्यकारस्य तथात्वात्. सूत्रं तु चक्रे इत्यादौ सावकाशमिति. सत्यं । इह निमित्तशब्देन साक्षाद्वा समु
दायघटकतया वा द्वित्वप्रयोजकत्वमाश्रीयते. न तु साक्षादेवेत्याग्रहः । लक्ष्यानुरोधात्. किंच. सूत्रे निमित्तशब्दो
नास्त्येव किंतु लक्षणया वा द्विरुच्यते तस्मिन्निति द्विर्वचनमिति व्युत्पत्त्या वा द्विर्वचनमस्यास्मिन्नित्यर्शआद्य
चा वा द्विर्वचननिमित्तं ज ध्यं तत्र प्रकारत्रयं साक्षात्परंपरासाधारणप्रयोजकेपितुवचम्. एतच्च ठस्येक इति राम: २१८
सूत्रे कैयटे स्पष्टं । अत एव ऊर्णोतेः सनि सनीवंतेतीट्पक्षे विभाषोर्णोरिति ङित्वविरहे गुणेन ऊर्णुनविषतीति सिद्धं. सन्नं
तस्य द्वित्वविधानेपि सनो द्वित्वप्रयोजकत्वेन तस्मिन् गुणादेशयोर्द्वित्वे कर्तव्ये स्थानिवद्भावात्. तदुक्तं. तद्भावभा
वितामात्रेऽपि निमित्तत्वमिति । यस्मात्तस्माद्द्विर्वचनाक्षिप्तः प्रत्ययो ऽचीत्यनेन विशेष्यते. परस्मिन्नित्यनुवर्तते. अमी

ह२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यामच्छेदेवृद्गात्परमान येत्युक्ते यथा सजातीयेन मनुष्याणाव्यवहितः पर आनीयते तथेहापि प्रत्ययांतरेणाव्यवहितः प
रो गृह्यते। तेन द्वित्वनिमित्तेऽजादौ प्रत्यये प्रत्ययांतरेणाव्यवहिते परे सति यो जादेशः सः स्थानिवत्स्यादिति सूत्रार्थः। एवं
च चक्रतुरित्यादौ न काप्यनुपपत्तिः। वक्ष्यमाणज्ञापकबलेन लिंचाव्यवहिते प्रवृत्तावपि दिदवनीयिषतीत्यादावनेक
प्रत्ययव्यवधानादप्रवृत्तिः। अपि च यदि सत्र वर्णव्यवधानेपि प्रत्ययांतराभावात्प्रवृत्तिः। अनुवादे परिभाषानुपस्था
नेपि निर्दिष्टपरिभाषाकर्तव्यस्थानिवदिहध्वेति बोध्यं। अतएवेह परस्मिन्नित्यनुवर्त्तत इति न्यासकारः। तथा द्विर्वचनेने
ऽप्रत्ययाक्षेपं वदनूर्णिजि लेनाव्यवहिते ज्ञापकस्याप्रवृत्तिं [redacted] ध्रुवन्नके यदप्येतदभिप्रेति। ऊर्णुनविषतीति सिध्ये
तुतज्ञावभावितामात्रेणोह [redacted] निमित्तत्वेति स्त्री क्रियते एवेत्यवधेयं। नन्वेवमपि रिरिषतीति न सिध्येत्। अधातोः सनि
क्षिपूङ्रंज्यशांसनीति इटि कृते इसुशब्दनिमित्तकस्य गुणस्य स्थानिवद्भावेनाजादेर्द्वितीयस्येति सो द्वित्वप्रसंगादिष्यते
तुरिस्त्रशब्दस्य द्वित्वं। अत्रोच्यते। नहि काधीनिमित्तत्वं याश्रीयत इति दीधीवेवीटामिति सूत्रोपपादितत्वाल्लेटि सूशब्दो निमित्तं
अतो न स्थानिवद्भावः। न चैवं सन्नन्तस्य कार्यित्वात् हल्लुनविषतीत्यत्रापि न स्यादिति वाच्यं। मत्वर्थीयेन निमित्तकार्यम
नुभवत एव कार्यित्वलाभात्। तत्र [redacted] तु द्वितीय एकाचो द्वित्वरूपं कार्यमनुभवति न तु सन्। अरिरिषतीत्यत्र तु रिस्शब्द
य स्यैव कार्यभाक्त्वमिति वैषम्यात्। नन्वेवं मचीत्यस्य जेघ्रीयते देध्मीयते इति घ्राव सैन संगच्छते। घ्रीपृ ध्मीपृ इति द्विती
याजवधिकस्यैकाचः कार्यित्वया यङोपि द्वित्वनिमित्तत्वाभावादिति चेत्सत्यं। अघिजं गे इत्येवा जय्य इत्यादावसंमकु
नत्र हिगाङ्लिटीति द्विलकारकनिर्देशमाश्रित्य लावस्थायामेव गाङादेश इति भाष्ये [redacted] एवमस्तु। इदं च वार्त्तिक
मतमनुसृत्योक्तं। तत्र लिटि लिङी त्यादीनां परसप्तमी [redacted] त्वाभ्युपगमात्। भाष्यमते तु लिङ्धातुकीयाः सामान्येन भवं
